# श्रीवैखानसधर्मसूत्रस्वरूपम्

सम्पादकः

डा. वेदान्तं श्रीविष्णुभट्टाचार्यः



CSUGCKL
R68 1
30461
Acc.No: 30461

ग्रन्थकर्ता

## वाडपल्लि पवन् कुमार्

M.A. M.Phil, B.Ed.

श्रीवेदान्तनिलयपब्लिकेषन्स्, तिरुपतिः

CAT. No: 16538
HOLD ID: 28248
BOOK No: 1
LOCATION: 14-A-5

# श्रीवैखानसधर्मसूत्रस्वरूपम्

सम्पादकः

**डा. वेदान्तं श्रीविष्णुभट्टाचार्यः**

प्रवाचकः, आगमविभागः

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

ACCESSION NO. 30461
DATE 29/11/12

ग्रन्थकर्ता

**वाडपल्लि पवन् कुमार्**

M.A. M.Phil, B.Ed.

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT. OF INDIA)
PURANATTUKARA
THRISSUR-680551-KERALA.
LIBRARY

**वेदान्तनिलयपब्लिकेषन्स्**

तिरुपतिः

२०१०

Sri Vaikhanasa Dharmasutraswarupam

By
Vadapalli Pavan Kumar
M.A., M.Phil, B.Ed.

Edited by
Dr. Vedantam SriVishnubhattacharyulu
M.A., Ph.D.

First Edition : December, 2010

Copies : 500

Price : 100/-

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT. OF INDIA)
ACCESSION NO. 30461
DATE 29/11/12

Copies can be had from :

Vedantya Nilaya Publications
18-1-386, Bhavani Nagar,
Tirupati, Chittoor-Dt., A.P.
Ph : 0877-2258097

D.T.P
Srivari Graphics, Tirupati.
Cell : 9948434277

**VEDANTAM DESIKACHARYULU**
T.T.D. Agama Advisor,
Appikatla
Bapatla -Mandalam
Guntur-Dt., A.P.

श्रियैनमः

# आनन्दः

विदितचरमेवेदं विश्वेषामपि विदुषां वेदार्थप्रतिपादकेषु षडङ्गेषु कल्पः वेदपुरुषस्य हस्त इति। श्रीमद्विखनोमुनिप्रणीतं वैखानसकल्पसूत्रम् अष्टादशकल्पसूत्रेषु मध्येमणिन्यायेन विराजितमिति, इदं स्मार्त-धर्म-प्रवर-श्रौतेति चतुर्भिः विभागैः समलङ्कृतं द्वात्रिंशत्प्रश्नात्मकं च भवतीति च सार्वजनीनोऽयमंशः।

**वैखानसधर्मसूत्रस्वरूपम्** इत्यस्मिन् ग्रन्थे धर्मसूत्रस्य स्वरूपं, वैशिष्ट्यं, मन्त्राणां सूची चेत्यंशाः आयुष्मता **वाडपल्लि पवनकुमारेण** सङ्कलिताः समालोचिताश्च। मनु-आपस्तम्ब-बोधायनादिमहर्षिभिः सर्वोत्तमत्वेन श्रीवैखानसधर्मं प्रति प्रशंसितानि यानि वाक्यानि तानि स्वीकृत्य तत्र तत्र उपस्थापितानि च।

विशेषतः चतुर्थाध्याये वर्णाश्रमभेदाः ब्रह्मचारिधर्माः गृहस्थधर्माः वानप्रस्थधर्माः भिक्षुकधर्माः सदाचारधर्माः सामान्यधर्माश्च अभिहिताः भवन्ति। आनन्दतुन्दिलोऽयं विषयः।

वैखानसधर्मस्वरूपविवरणात्मकपरोऽयं ग्रन्थः जिज्ञासूनां विदुषाम् अवश्यम् उपकारकः, आकरग्रन्थश्च भवतु इत्याशासे।

एतादृशग्रन्थनिर्माणे **वाडपल्लि पवनकुमारस्य** भगवान् श्रीनिवासः तुष्टिः पुष्टिः आयुः आरोग्यं भोगं भाग्यं च प्रदादातु इति आशास्य, ग्रन्थसम्पादकं **डा.वेदान्तं श्रीविष्णुभट्टाचार्यं** च अभिनन्द्य विरम्यते।

***यतो धर्मस्ततो जयः***

तिरुपतिः — देशिकाचार्यः

विकृति कार्तिक-

कृष्णसप्तमी भानुवासरः

# विज्ञानसर्वस्वः

ज्ञायते यदविच्छिन्नगुरुशिष्यपरंपरानुरोधेन विद्यमाने आगमवाङ्मये वैखानसागमः श्रुतिमार्गानुगामी अनिन्दितः अप्रतर्क्यः सर्वभूतहितः मोक्षमार्गोपदेशकः भवतीति।

अचिन्त्याद्भुतस्वभावलावण्यरत्नाकरस्य वेदवेद्यस्य श्रीमहाविष्णोः अर्चन-स्नपनोत्सव-प्रायश्चित्तादि क्रियाकलापान् अर्चाबिम्बप्रतिष्ठाकर्मविशेषान् च समन्त्रकसर्वक्रियाप्रतिपादकत्वेन असौ उपदिशति।

अग्न्याधानं इष्टिः यागावभृथानां च यागकर्मणां प्रतिनिधित्वेन बिम्बप्रतिष्ठा-पर्वार्चनं - उत्सवावभृथमिति त्रीणि कर्माणि, "स वा एष पुरुषः पञ्चधा पञ्चात्मा" "पोपूयमानः पञ्चभिः स्वगुणैः प्रसन्नैः सर्वानिमान् धारयिष्यसि" इति श्रुत्यनुसारं पञ्चाग्नीनां स्थाने ध्रुव-कौतुक-स्नपन-उत्सव बलि इति पञ्चबेरपूजा विधिरपि उपदिशन् असौ अखिलजगत्कारणभूतश्रीमन्नारायणैकपरत्वेन च राराजतीति नैव सन्देहलेशः।

अस्य आगमस्य मूलग्रन्थः भृग्वादीनां चतुर्णां महर्षीणां ग्रन्थानामपि आधारग्रन्थः श्रीमद्विखनोमुनीन्द्रैः प्रणीतं वैखानसकल्पसूत्रमेव भवतीति सार्वजनीनोऽयं विषयः। विद्यतेऽपि सूत्रमिदं दैविकसूत्रेषु आदिममिति।

सूत्रमिदं गृह्य-धर्म प्रवर-श्रैतेति चतुर्भिः विभागैः

समलङ्कृतं भवति। एतेषु धर्मसत्रं अष्टम-नवम दशमेति त्रिषु प्रश्नेषु रारजति। धर्मसूत्रे ब्रह्मचारि-गृहस्थ-वानप्रस्थ-सन्यासाश्रमाणां धर्माः, भेदाः, सामान्यधर्माः, चातुर्वर्ण्यसङ्करोत्पन्नकथनप्रतिज्ञा च भेदोपभेदैः विव्रियन्ते।

अस्य वैखानसधर्मसूत्रस्य स्वरूपं कीदृशं? धर्मसूत्रवैशिष्ट्यं कथम् उपपाद्यते, मनु- आपस्तम्ब-बोधायनादिभिः महर्षिभिः स्वीयग्रन्थेषु सङ्ग्रहणविधानं कीदृशं इत्याद्यैः विशिष्टैः अंशैः वर्तते पञ्चाध्यायपरिमितलघुसमालोचनात्मकग्रन्थः आयुष्मता **वाडपल्लि पवनकुमारेण** विलिखितः तत्र तत्र केचनांशान् सङ्कलिताश्च।

असौ लघुशोधग्रन्थः मम सम्पादकत्वे श्रीवेदान्तनिलयं तिरुपतिः इति संस्थया प्रकाशितोऽयं सारस्वतसेवाक्रियमाणविदुषां आगमज्ञानां परिशोधकानां पण्डितानां विद्वन्मण्डलमण्डनायमानानां भवतां सर्वेषां च विज्ञानसर्वस्वोभवतु इत्याशासे।

धर्मं वैखानसं सूत्रम् ।
राजताद्धुविराजतात्॥

तिरुपति
२१-११-२०१०
विकृति, कार्तीकपूर्णिमा

- श्रीविष्णुभट्टाचार्यः

# उपोद्घातः

अखिलजगदुद्भवस्थितिसंहारकारकस्य जगद्रक्षकस्य परमात्मनः सकाशात् सर्वाणि च शास्त्राणि समुत्पन्नानि भवन्ति। वेद-आगम-धर्म-स्मृति-इतिहास-पुराण-काव्य-नाटक-अलङ्कारादि यानि शास्त्राणि विलसन्ति तानि सर्वाण्यपि धर्मस्यैव आधारभूतानि इति वक्तुं नैव अतिशयोक्तिः। यत्र धर्मः विलसति तत्रैव जयः सिध्यति।

अस्माकं भरतभूमिः या अस्ति सेयमपि धर्मभूमिरिति कीर्त्यते। शास्त्राणाम् अध्यापनादयः गुरुकुलपद्धतिः आश्रमाः नदीनदतटाकारामादीनि च सर्वाणि नैकसंख्याकानि अस्यां भूमावेव राराजन्ते इति सर्वैः ज्ञायते एव।

यत्तेरूपं कल्याणतमं तत्ते पश्यामि ॥
(ईशावास्योपनिषद् - १६)

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतगं समाः॥
(ईशावास्योपनिषद्-२)

यत्कल्याणतमं रूपं वर्तते तत् रूपं द्रष्टुं शक्यते सर्वैः अनेन अखिलाण्डकोटिब्रह्माण्डनायकस्य परमात्मनः दिव्यानुग्रह-विशेषेणैव। श्रौतस्मार्तकाम्यकर्माणि सर्वाणि कुर्वन् शतसंवत्सरपर्यन्तं जीवामि इत्यादीनि बहूनि श्रुतिवाक्यानि राराजन्ते अस्यां भरतभूमौ।

## नान्यः पन्था विद्यतेऽयनाय

(श्वेतश्वतरोपनिषद् ६-१५)

मुक्तिं प्राप्तुं भगवत्तत्त्वदर्शनं विना अन्यो मार्गः नैव उपदिष्टः।

प्रमाणवाक्यानि एतानि सर्वाणि समालोच्यन्ते चेत् धर्मः एव पुरुषार्थः भवेत्। धर्मः अनेकविधः वर्णधर्माः, आश्रमधर्मः, उभयधर्मः, आपद्धर्मः, स्त्रीधर्मः, पतिधर्मः, राजधर्मः, गुरुधर्मः, शिष्यधर्मः, सामान्यधर्मः, विशेषधर्माश्च इति बहुधा श्रूयन्ते। यः पुरुषः धर्मान् रक्षति रक्षितास्ते च धर्माः। स्व रक्षकान् तान् पुरुषान् कृतज्ञतयैव समस्तदुःखनिवृत्तिपूर्वकनित्यनिरवद्यापरिच्छिन्ना-वाङ्मनसगोचरानन्दस्वरूपनिःश्रेयसेन योजयित्वा रक्षन्तीति परमार्थः।

अत एव सर्वप्रमाणमूर्धन्यपारंगताः तपोनिष्ठागरिष्ठाः महर्षयः अस्माननुजिघृक्षया कल्पसूत्रग्रन्थान् उपदिदिशुः। कल्पसूत्रग्रन्थेषु-श्रौत-स्मार्त काम्यानुष्ठानयज्ञाः संस्काराः आश्रमधर्माश्च प्रबोधिताः भवन्ति।

धर्मप्रबोधकेषु कल्पसूत्रेषु दैविकेषु आदिमः श्रीवैखानसकल्पसूत्रनामक ग्रन्थः। अयं साक्षात् भगवता विखनोमुनिना उपदिष्टः। अयं तावत् मनु - आपस्तम्ब-बोधायनादिभिः समादृतः स्वीकृतश्च।

वैखानसकल्पसूत्रमिदं तावत् वैखानसागमस्य आदिमं वैखानसजनानामपि आधारभूतं च अस्ति।

श्रीमन्नरायाणैकपरत्वं परमवैष्णवत्वं साङ्गक्रियाकलापवत्वम् अत्यन्तं प्राचीनं च, इदं सूत्रं कृष्णयजुर्वेदतैत्तरीयशाखासम्बद्धं च भवति।

स्मार्त-धर्म-प्रव-श्रौतेति चतुर्भिः विभागैः समलङ्कृतमिदं श्रीवैखानसकल्पसूत्रं द्वात्रिंशत् प्रश्नात्मकं सूत्ररूपं च राराजते। वैखानसधर्मसूत्रस्य स्वरूपं कीदृशं? के के धर्माः तत्र प्रतिपादिताः? वर्णधर्माः के? आश्रमधर्माः के के? तेषां भेदाः कीदृशाः? इत्यादीनाम् अंशानां समालोचनाय **वैखानसधर्मसूत्रस्वरूपम्** इत्यंशमधिकृत्य यथामति समालोचनं कर्तुं मम मनसि उत्साहः सञ्जातः। तम् उत्साहमधिकृत्य पञ्चाध्यायपरिमितः लघुग्रन्थः महता प्रयत्नेन आर्षजिज्ञासूनाम् उपकाराय मया विनिर्मितो वर्तते।

समालोचन ग्रन्थस्यास्य स्वरूपं इत्थं भवति।

**कल्पसूत्रपरिचयः** इति नाम्ना विरचिते **प्रथमाध्याये** निगमः, वेदः, वेदभागाः, वेदभागपरिचयः, षडङ्गानि, कल्पः, कल्पसूत्रस्वरूपं, शाखान्तर्गतानि कल्पसूत्राणि, श्रीवैखानसकल्पसूत्रम् इत्येते अंशाः मया समालोचनार्थं स्वीकृताः वर्तन्ते।

**वैखानसागमपरिचयः** इति नाम्ना **द्वितीयाध्याये** आगमः, वैष्णवागमः, पाञ्चरात्रागमः, पाञ्चरात्रगमग्रन्थाः, वैखानसागमः, वैखानसागमग्रन्थाः, वैखानसकल्पसूत्रं, भृगुमहर्षिग्रन्थाः, मरीचिमहर्षिग्रन्थाः, अत्रिमहर्षिग्रन्थाः,

कश्यपमहर्षिग्रन्थाः, वैखानसागमग्रन्थस्वरूपः, वैखानससम्बद्धाः आलयाः श्रीवेङ्कटाद्रिदिव्यक्षेत्रस्वरूपं, श्रीवेङ्कटाचलस्य नित्यनैमित्तिककाम्योत्सवाः इत्येते अंशाः अनुशीलिताः भवन्ति।

**वैखानसकल्पसूत्रपरिचयः** इत्यस्मिन् **तृतीयाध्याये** अस्य वैखानसकल्पसूत्रस्य प्रचुरणविवरणं कल्पसूत्रस्य स्वरूपस्वभावौ विशिष्टाश्च धर्माः विलिख्यन्ते।

--------- **धर्मसूत्रस्वरूपम्** इत्यस्मिन् **चतुर्थाध्याये** श्रीवैखानसधर्मसूत्रे ये उपदिष्टाः अंशाः सन्ति तेषां समीक्षा मयात्र क्रियते। वर्णाश्रमधर्माः, अश्रमभेदाः, ब्रह्मचारी, ब्रह्मचारिधर्माः ब्रह्मचारिभेदाः, गृहस्थः गृहस्थधर्माः, गृहस्थभेदाः, वानप्रस्थः, वानप्रस्थधर्माः, श्रामणकाग्निकुण्डलक्षणं, वानप्रस्थभेदाः, श्रीवैखानससूत्रोक्तवानप्रस्थस्य सार्वत्रिकता, भिक्षुकः, भिक्षुकधर्माः, भिक्षुकभेदाः, आश्रमधर्मानुष्ठानफलं, वर्णाश्रमाणां मोक्षोपायः, सदाचाराः, सामान्यधर्माः, नारायणबलिः, श्रीवैखानसधर्मसूत्रे तत्तदाश्रमधर्मकर्मानुष्ठाने ये ये मन्त्राः सन्ति तान् च पट्टिकारूपेण प्रदर्श्यन्ते। ततः सङ्करोत्पन्नानां कथनम्, अनुलोम-प्रतिलोमानां पितृ-मातृ-वृत्ति- आकर-निर्णयविधानम् इत्येते अंशाः समीक्षार्थं स्वीकृत्य एकैकमंशमधिकृत्य यथामति समीक्षिताः सन्ति।

**उपसंहाररूपः पञ्चमोऽध्यायः** भवति।

लघुग्रन्थेऽस्मिन् प्रथमानुबन्धे वैखानससूत्रोक्तवान-प्रस्थधर्मवैशिष्ट्यं प्रतिपादितस्य दशविधहेतुनिरूपणस्य अष्टमोहेतुः

यथाग्रन्थः प्रदत्तः। **द्वितीयानुबन्धे** वैखानसधर्मसूत्रे चातुर्वर्ण्यसङ्करोत्पन्नकथनप्रतिज्ञायां यानि सूत्रवाक्यानि सन्ति तानि सर्वाणि गवेषकाणां सौकर्याय जिज्ञासूनाम् उपकाराय च प्रदत्तानि सन्ति।

ग्रन्थोऽयं अस्मद्गुरुचरणानां आगमविदुषां राष्ट्रियसंस्कृत विद्यापीठे आगमविभागे प्रवाचकपदे विराजमानानां आचार्याणां डा. वेदान्तं श्रीविष्णुभट्टाचार्याणां सम्पादकत्वेन वेदान्तनिलय पब्लिकेषन्स् तिरुपति द्वारा मुद्राप्यते इति मम मनः आनन्दमनुभवति। मोदः प्रमोदः आनन्दश्च।

सर्वान् विद्वन्मण्डलयमण्डनायमानविदुषः मया सम्प्रार्थ्यते लघुग्रन्थेऽस्मिन् ये गुणाः सन्ति तानेव स्वीकृत्य दोषान् परित्यज्य माम् अनुगृह्णन्तु भवन्तः इति।

**त्वदीयं वस्तु गोविन्द!।**
**तुभ्यमेव समर्पये ॥**

**तिरुपतिः** विनीतः
**दिनाङ्कः** **वाडपल्लि पवन् कुमार्**

## सङ्केताक्षरसूची

| | | |
|---|---|---|
| आग.द. | - | आगमदर्शिनी |
| ऋ.सं. | - | ऋग्वेदसंहिता |
| क.सू. | - | कल्पसूत्र |
| क्रिया. | - | क्रियाधिकारः |
| ज्ञान. | - | ज्ञानकाण्डः |
| पृ. | - | पृष्ठम् |
| मनु. | - | मनुस्मृतिः |
| वाच. | - | वाचस्पत्यम् |
| वैखा. | - | वैखानसागममु |
| वै.वि. | - | वैष्णवागमविमर्शः |
| श्री.भग.वि. | - | श्रीभगवदाराधनाविधिः |
| श्री.वे.वै. | - | श्रीवेङ्कटेश्वरवैभवम् |
| श्री.वै.गृ.सू. | - | श्रीवैखानसगृह्यसूत्रम् |
| श्री.वै.ध.सू. | - | श्रीवैखानसधर्मसूत्रम् |
| श्री.वै.श्रौ.सू. | - | श्रीवैखानसश्रौतसूत्रम् |
| श्री.वै.स्मा.सू.नृ.भा. | - | श्रीवैखानसस्मार्तसूत्रं नृसिंहवाजपेयभाष्यम् |
| सं.वा.बृ.इ. | - | संस्कृतवाङ्मय का बृहदितिहास |
| सं.सा.इ. | - | संस्कृतसाहित्येतिहासः |

# विषयसूची


| विषयः | | पृष्ठसंख्या |
|---|---|---|
| १. प्रथमोऽध्यायः | (कल्पसूत्रपरिचयः) | 1 |
| १.१. | निगमः | 2 |
| १.२. | वेदः | 2 |
| १.२.१. | वेदभागाः | 2 |
| १.२.२. | वेदशाखापरिचयः | 3 |
| १.३. | षडङ्गानि | 4 |
| १.३.१. | शिक्षा | 5 |
| १.३.२. | व्याकरणम् | 6 |
| १.३.३. | छन्दः | 7 |
| १.३.४. | निरुक्तम् | 8 |
| १.३.५. | ज्योतिषम् | 9 |
| १.३.६. | कल्पः | 10 |
| १.३.६.१. | कल्पसूत्रस्वरूपम् | 10 |
| १.३.६.२. | श्रौतसूत्राणि | 11 |
| १.३.६.३. | धर्मसूत्राणि | 11 |
| १.३.६.४. | गृह्यसूत्राणि | 11 |
| १.३.६.५. | शुल्बसूत्राणि | 12 |
| १.३.६.६. | प्रवरसूत्राणि | 12 |

| | | |
|---|---|---|
| १.३.६.७. | शाखान्तर्गतानि कल्पसूत्राणि | 12 |
| १.३.६.८. | श्रौतसूत्रपट्टिका | 13 |
| १.३.६.९. | गृह्यसूत्रपट्टिका | 14 |
| १.३.६.१०. | धर्मसूत्रपट्टिका | 15 |
| १.३.६.११. | प्रवरसूत्रपट्टिका | 16 |
| १.३.६.१२. | शुल्बसूत्रपट्टिका | 17 |
| १.३.७. | श्रीवैखानसकल्पसूत्रम् | 18 |
| **२. द्वितीयोऽध्यायः** | **(वैखानसागमपरिचयः)** | 19 |
| २.१. | आगमः | 19 |
| २.२. | वैष्णवागमः | 20 |
| २.२.१. | पाञ्चरात्रागमः | 20 |
| २.२.२. | पाञ्चरात्रागमग्रन्थाः | 21 |
| २.२.३. | वैखानसागमः | 22 |
| २.२.३.१. | वैखानसागमग्रन्थाः | 22 |
| २.२.३.२. | वैखानसकल्पसूत्रम् | 23 |
| २.२.३.३. | भृगुमहर्षिग्रन्थाः | 24 |
| २.२.३.४. | मरीचिमहर्षिग्रन्थाः | 24 |
| २.२.३.५. | अत्रिमहर्षिग्रन्थाः | 25 |
| २.२.३.६. | कश्यपमहर्षिग्रन्थाः | 25 |
| २.२.४. | वैखानसागमग्रन्थस्वरूपः | 25 |

| | | |
|---|---|---|
| २.२.५. | श्रीवैखानसागमसम्बद्धाः आलयाः | 27 |
| २.२.६. | श्रीवेङ्कटाद्रिदिव्यक्षेत्रस्वरूपम् | 29 |
| २.२.७. | श्रीवेङ्कटाचलक्षेत्रे - नित्यनैमित्तिककाम्योत्सवाः | 31 |
| **३. तृतीयोऽध्यायः** | **(श्रीवैखानसकल्पसूत्रपरिचयः)** | 33 |
| ३.१. | श्रीवैखानसकल्पसूत्रम् | 33 |
| ३.१.१ | श्रीवैखानसगृह्यसूत्रम् | 34 |
| ३.१.२. | श्रीवैखानसधर्मसूत्रम् | 36 |
| ३.१.३. | श्रीवैखानसप्रवरसूत्रम् | 37 |
| ३.१.४. | श्रीवैखानसश्रौतसूत्रम् | 38 |
| ३.१.५. | श्रीवैखानसधर्मसूत्रभाष्याणि | 40 |
| ३.२. | श्रीवैखानसकल्पसूत्रे विशिष्ठाः धर्माः | 40 |
| ३.२.१. | ब्रह्मचारिधर्माः | 41 |
| ३.२.२. | वानप्रस्थधर्माः | 41 |
| ३.२.३. | गृहस्थधर्माः | 41 |
| **४. चतुर्थोऽध्यायः** | **(वैखानस धर्मसूत्रस्वरूपम्)** | 43 |
| ४.१. | वर्णाश्रमधर्माः | 44 |
| ४.२. | आश्रमभेदाः | 44 |
| ४.२.१. | ब्रह्मचारी | 45 |
| ४.२.२. | ब्रह्मचारिधर्माः | 45 |

| | | |
|---|---|---|
| ४.२.३. | ब्रह्मचारिभेदाः | 46 |
| ४.२.३.१. | गायत्रब्रह्मचारी | 46 |
| ४.२.३.२. | ब्राह्मब्रह्मचारी | 46 |
| ४.२.३.३. | प्राजापत्यब्रह्मचारी | 47 |
| ४.२.३.४. | नैष्ठिकब्रह्मचारी | 47 |
| ४.३. | गृहस्थः गृहस्थधर्माश्च | 47 |
| ४.३.१. | गृहस्थभेदाः | 48 |
| ४.३.२. | वार्तावृत्तिगृहस्थः | 48 |
| ४.३.३. | शालीनवृत्तिगृहस्थः | 48 |
| ४.३.४. | यायावरगृहस्थः | 49 |
| ४.३.५. | घोराचरिकगृहस्थः | 49 |
| ४.४.१. | वानप्रस्थः | 49 |
| ४.४.२. | वानप्रस्थधर्माः | 50 |
| ४.४.३. | श्रामणकाग्निकुण्डलक्षणम् | 51 |
| ४.४.४. | श्रीवैखानसधर्मसूत्रोक्त श्रामणकाग्निकुण्डलक्षणम् | 52 |
| ४.४.५. | वानप्रस्थभेदाः | 52 |
| ४.४.६. | औदुम्बरवानप्रस्थः | 53 |
| ४.४.७. | वैरिञ्चवानप्रस्थः | 53 |
| ४.४.८. | वालखिल्यवानप्रस्थः | 54 |

| | | |
|---|---|---|
| ४.४.९. | फेनपवानप्रस्थः | 54 |
| ४.४.१०. | अपत्नीकभेदाः | 54 |
| ४.४.११. | अपत्नीकवानप्रस्थधर्माः | 58 |
| ४.५. | वैखानससूत्रोक्तवानप्रस्थस्य सार्वत्रिकता | 59 |
| ४.६.१. | भिक्षुकः | 62 |
| ४.६.२. | भिक्षुकधर्माः | 62 |
| ४.६.३. | भिक्षुकभेदाः | 64 |
| ४.६.४. | कुटीचकभिक्षुकः | 64 |
| ४.६.५. | बहूदकभिक्षुकः | 64 |
| ४.६.६. | हंसभिक्षुकः | 64 |
| ४.६.७. | परमहंसभिक्षुकः | 65 |
| ४.७. | आश्रमधर्मानुष्ठानफलम् | 65 |
| ४.८. | अनिरोधकः | 67 |
| ४.९. | निरोधकः | 67 |
| ४.१०. | मार्गगः | 67 |
| ४.११. | विमार्गगः | 67 |
| ४.१२. | दूरगः | 67 |
| ४.१३. | अदूरगः | 68 |
| ४.१४. | भ्रूमध्यगः | 68 |
| ४.१५. | असम्भक्तः | 68 |

| | | |
|---|---|---|
| ४.१६. | सम्भक्तः | 68 |
| ४.१७. | विसरगः | 68 |
| ४.१८. | वर्णाश्रमाणां मोक्षोपायः | 68 |
| ४.१९. | सदाचाराः | 70 |
| ४.१९.१. | सामान्यधर्माः | 70 |
| ४.२०. | नारायणबलिः | 74 |
| ४.२१. | वैखानसधर्मसूत्रे प्रोक्तानां मन्त्राणां पट्टिका | 75 |
| ४.२२. | सङ्करोत्पन्नानां कथनम् | 84 |
| ४.२२.१, | श्रीवैखानसधर्मसूत्रोक्त अनुलोम-प्रतिलोमानां पट्टिका | 85 |
| ५. पञ्चमोऽध्यायः | (उपसंहारः) | 88 |
| अनुबन्धः- १ | दशविधहेतुनिरूपणम् (अष्टमहेतुः) | 91 |
| अनुबन्धः -२ | चातुर्वर्ण्यसङ्करोत्पन्नकथनप्रतिज्ञा | 95 |
| उपयुक्तग्रन्थसूची | | 103 |

श्रीलक्ष्मीहयग्रीवाय नमः

ज्ञानानन्दमयं देवं  निर्मलस्फटिकाकृतिम्।
आधारं सर्वविद्यानां हयग्रीवम् उपास्महे॥

# प्रथमोऽध्यायः

## कल्पसूत्रपरिचयः

अखिलबृन्दारकवन्दारकबृन्दनिरन्तरसमाराधित-चरणारविन्दयुगलस्य अखिलाण्डकोटिब्रह्माण्डनायकस्य अखिलहेयप्रत्यनीककल्याणगुणाकरस्य श्रीमन्नारायणस्य उच्छ्वासनिश्श्वासरूपेण निगदितस्य शब्दजातस्य वेद इति प्रसिद्धिः राराजते। वेदराशेः तावत् पुराणेतिहास - धर्म - काव्य - नाटक - अलङ्कारादिसकलशास्त्रग्रन्थाः सर्वे समुत्पन्नाः वर्तन्ते इति सकलजनविदितोऽयमंशः।

सर्वैः ज्ञायते यत् परमात्मनः श्रीमन्नारायणस्य अङ्गसदृशानि शिक्षादीनि षट् शास्त्राणि प्रवर्तन्ते इति। तेषु कल्पसूत्रग्रन्थः हस्तरूपेण विद्यते इति ज्ञायते। तं प्रति परिशीलयामः।

कल्पसूत्रपरिचयः नाम अस्मिन् प्रथमाध्याये


| | | | |
|---|---|---|---|
| १. | निगमः | ८. | छन्दः |
| २. | वेदः | ९. | निरुक्तम् |
| ३. | वेदभागाः | १०. | ज्योतिषम् |
| ४. | वेदशाखापरिचयः | ११. | कल्पः |
| ५. | षडङ्गानि | १२. | कल्पसूत्रस्वरूपम् |
| ६. | शिक्षा | १३. | शाखान्तर्गतानि कल्पसूत्राणि |
| ७. | व्याकरणम् | १४. | श्रीवैखानसकल्पसूत्रम् |

इत्येतान् अंशान् यथामति समालोचितुमिच्छामि।

तत्रादौ-

### १.१.निगमः

**नितरां गम्यते सप्रमाणम् अनेन इति निगमः।** भगवतः परमात्मनः श्रीमन्नारायणस्य वस्तुतत्त्वं यथार्थरूपेण यत्र वर्णनं कृतं स एव निगमः इति नामसार्थक्यमभूत्। निगमशब्दो वेदवाची। निगमादेव सर्वाणि च शास्त्राणि समुत्पन्नानि इति निश्चप्रचोऽयमंशः[१]।

### १.२. वेदः

विद् ज्ञाने इत्यस्मात् धातोः निष्पन्नोऽयं वेदशब्दः निगमपदस्य पर्यावाचकः। स्थूल सूक्ष्म -चिद्-अचित्-प्रकृति-परमात्मविशेषणयथार्थवस्तुस्वरूप- विवेचनज्ञानमेव वेदपदस्य अर्थो भवति। तच्चज्ञानं वेदभागैः षडङ्गैः शास्त्रैश्च साधितं भवेत्।

वेदभागाः कति? वेदशाखाः के के वर्तन्ते? षडङ्गानि च शास्त्राणि कानि? इति यथामत्यत्र परिशीलितुमिच्छामि।

### १.२.१. वेदभागाः

वेदस्तावत् चतुर्धा विभक्तः वस्तुवैशद्येन ऋक् - यजुः- साम - आथर्वण इति। मन्त्रद्रष्टृभिः महर्षिभिः परिनिर्धारिताः सन्ति मन्त्र-ब्राह्मण - आरण्यक - उपनिषत् इति।

---

१. वाच. Vol. 5. पृ. ४०५८

तत्र **मन्त्रभागः** तावत् कर्मोपासनप्रतिपादकः भवति।

**ब्राह्मणभागः** श्रौतयज्ञादिषु वैदिकमन्त्राणां विनियोगविधिः तद्विषयविवरणं च उपदिशति।

**आरण्यकभागः** अरण्ये पठितुं ये मन्त्राः सन्ति ते एव अत्र विद्यन्ते।

**उपनिषद्भागः** ब्रह्मविद्यया तत्त्वज्ञानं जीवसमीपे निषीदति सैव उपनिषत् इति विज्ञायते[१]।

## १.२.२. वेदशाखापरिचयः

ऋग्वेदस्तावत् एकविंशतिशाखापरिमितः भवति। तत्र आश्वलायन- सांख्यायन - शाकल - बाष्कल - माण्डुकेयशाखानां समुल्लेखः एव अद्य उपलभ्यते इति चरणव्यूहग्रन्थाधारेण ज्ञायते।

यजुर्वेदस्तावत् कृष्ण - शुक्लभेदेन द्विधा परिगण्यते। तत्र कृष्णयजुर्वेदस्तावत् षडशीतिशाखापरिमितः भवेदिति ज्ञायते।

शुक्लयजुर्वेदस्तावत् काण्व - माध्यन्दिन- श्यावीय - स्थापायनीय- कापाल - पौण्ड्रवत्स- आवटिक - परमावटिक - पाराशर्य - वैधेय- वैनेय - औधेय - गालव - बैजव- कात्यायनीयशाखा सन्तीति ज्ञायते।

---

१. सं.वा.

सामवेदस्य सहस्रसंख्याकाः शाखाः आसन् इति निर्धार्यन्ते।

अथर्वणवेदस्य पिप्पलाशाखा, दान्तशाखा, प्रदान्तशाखा, औताशाखा, जाबालशाखा, शौनकाशाखा, ब्रह्मपलाशशाखा, कुनखीवेददर्शिशाखा, चारणविद्याशाखा इति नव शाखाः आसन्।

विविधानाम् एतासां शाखानां समाहार एव वेदस्वरूपः इति, स एव विज्ञानसर्वस्वः अपौरुषेयः शब्दराशिः एव भवतीति निष्कर्षः[१]।

### १.३. षडङ्गानि

छन्दः पादौतु वेदस्य हस्तौ कल्पोऽथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।

वेदार्थावबोधनाय मन्त्रार्थज्ञापनाय मन्त्रविनियोगाय पदपदार्थसाध्वसाधुज्ञापनाय च षडङ्गानि शिक्षा निरुक्तं व्याकरणं छन्दः ज्योतिषं कल्पश्चेति षट् विराजन्तेति एतेषु षट्सु शास्त्रेषु

---

१. सं.वा.

छन्दश्शास्त्रं वेदपुरुषस्य पादसदृशं,
कल्पशास्त्रं हस्तसदृशं, ज्योतिषशास्त्रं नेत्रसदृसं,
निरुक्तशास्त्रं श्रोत्रसदृशं, शिक्षाशास्त्रं घ्राणसदृशं,
व्याकरणशास्त्रं मुखसदृशं च विद्यन्ते इति च[१]
आर्योक्तिः। एतान् परिशीलयामः-

### १.३.१. शिक्षा

स्वरवर्णादि उच्चारणप्रकारो यत्र शिक्ष्यते सा शिक्षा। वेदमन्त्र स्वराक्षर उच्चारणविषयकविवरणविधानं मन्त्रपाठस्य गुणदोषाणां प्रतिपादनं समस्तनियमादीनां परिवर्णनं च सविस्तरम् उपदिश्यते अस्मिन् शिक्षाशास्त्रे। बहवः शिक्षाग्रन्थाः सम्प्रत्युपलभ्यन्ते। ते च यथा-

**ऋग्वेदसम्बद्धाः शिक्षाग्रन्थाः**

वशिष्ठशिक्षा
पाणिनीयशिक्षा इत्यादयः सन्ति।

**कृष्णयजुश्शाखासम्बद्धाः शिक्षाग्रन्थाः**

वशिष्ठशिक्षा
चारायणीयशिक्षा
पाणिनीयशिक्षा
भारद्वाजशिक्षा इत्येते वर्तन्ते।

---

१. सं.सा.इ.

**शुक्लयजुश्शाखासम्बद्धाः शिक्षाग्रन्थाः**

याज्ञवल्क्यशिक्षा

माध्यन्दिनशिक्षा

मनःस्वारशिक्षा

यजुर्विधानशिक्षा

क्रमकारिकशिक्षा इत्येते सन्ति।

**सामवेदसम्बद्धाः शिक्षाग्रन्थाः**

गौतमशिक्षा

नारदशिक्षा

लोमशशिक्षा इत्येते वर्तन्ते।

**अथर्ववेदसम्बद्धाः शिक्षाग्रन्थाः**

माण्डूक्यशिक्षा

इत्येते शिक्षाग्रन्थाः बहवः अद्य उपलभ्यन्ते[१]।

### १.३.२. व्याकरणम्

एकश्शब्दः सुष्ठु प्रयुक्तः सम्यक् ज्ञातः स्वर्गे लोके च कामधुक् भवति इत्युक्तरीत्या छान्दस लौकिक उभयविधसंस्कृतभाषायाः पदानां तदर्थानां यथार्थज्ञानं च दोषरहितशुद्धप्रयोगादिकं च व्याकरणशास्त्रं परिसूचयति।

---

१. सं.वा.

अस्य व्याकरणशास्त्रस्य प्रवक्ता ब्रह्मा। इन्द्र-वायु - भरद्वाज - भागुरि - पौष्करस - चारायण - गौतमादिभिः व्याकरणशास्त्रं भृशं विस्तृतमभूत्। सहस्राधिकाः व्याकरण-शास्त्रग्रन्थाः ग्रन्थकर्तारश्च अद्य उपलभ्यन्ते[१]।

### १.३.३. छन्दः

छन्दयति आह्लादयति इति छन्दः। छन्दयति पुनाति रोचत इति छन्दः। छादयति मन्त्रप्रतिपाद्ययज्ञादीन् इति छन्दः। शास्त्रमिदं नादमाधुर्यसमाविष्कारकानि वैदिकलौकिक उभयविधछन्दांसि नियमलक्षणविधानैः सविस्तरं विवृणोति।

छन्दोभिः आविष्कृतेन श्रुतिमनोहरनादमाधुर्येण लयेनैव च अस्मिन् संस्कृतवाङ्मये गद्य पद्य प्रमाणापेक्षया पद्यप्रबन्धानां प्रभविष्णुत्वं प्रभूतं प्रतिभाति। छन्दसां द्वैविध्यं प्रतिपादितमस्ति वैदिकछन्दांसि तथा लौकिकछन्दांसि अपि।

वैदिकछन्दसां वर्णप्रधानतया निर्दुष्टान्येतानि गायत्री - उष्णिक्- अनुष्टुप् - बृहती - पङ्क्तिः - त्रिष्टुप्-जगती-छन्दांसि इति।

लौकिकछन्दांसि तावत् मात्रिकछन्दांसि - वर्णिकछन्दांसि इति द्विधा निर्धार्यन्ते। तत्र मात्रिकछन्दांसि तावत् विपुला-चपला - गीतिः- आर्यागीतिः इत्यादिनवविधानि भवन्ति।

---

१. तत्रैव

छन्दःशास्त्रे विद्यमानाः प्रधानग्रन्थास्तावत्-

| | |
|---|---|
| छन्दश्शास्त्रम् | वैदिकछन्दोऽनुक्रमणिका |
| वृत्तरत्नाकरः | छन्दोविच्छित्तिः |
| सुवृत्ततिलकम् | वृत्तरत्नावली |
| छन्दोमञ्जरी | वृत्तचन्द्रिका |
| वृत्तमणिकोशः | इत्यादयः[1] वर्तन्ते। |

### १.३.४. निरुक्तम्

वैदिकशब्दकोशस्य व्याख्यानं निरुक्तमुच्यते। संस्कृतशब्दानां नामलिङ्गादिनिदर्शनं, विग्रहव्युत्पत्यादि प्रदर्शनं समानार्थकपर्यायवाचिशब्दानां निरूपणं शब्दार्थसंबद्धानां वैदिक - दार्शनिक - तान्त्रिक - आगमिक - भौगोलिक-ऐतिहासिक-राजनीतिक - सामाजिकादिविविधसन्दर्भाणां च समाख्यानं विवरणं च निरुक्तग्रन्थेषु समुपलभ्यते। एकार्थ - नानार्थ -एकाक्षर - द्व्यक्षर - द्विरूप - त्रिरूप-विवरणपराः संस्कृतशब्दकोशाः अनेकविधाः निरुक्तशास्त्रे उपलभ्यन्ते।

तत्रापि निरुक्तग्रन्थेषु यास्कीयनिरुक्तः प्रधानतमः भवति। यास्कीय निरुक्तस्य पूर्वमेव बहवः निरुक्तग्रन्थाः सन्तीत्यपि श्रूयन्ते। वेदार्थावगमाय निरुक्तग्रन्थाः अत्यन्तमावश्यकाः भवन्ति।

---

१. सं.वा.

सं.सा.इ.

## १.३.५. ज्योतिषम्

श्रौतस्मार्तकाम्यकर्मानुष्ठानादीनां शुभाशुभमुहूर्तविचारः ज्योतिश्शस्त्रेणैव ज्ञातुं सिध्यति। वेदाङ्गज्योतिषानुसारेणापूर्वफलप्राप्तिसाधनसकलविधश्रौतस्मार्तधर्मानुष्ठानादीनां समुचितकालज्ञानं मुहूर्तज्ञानं च ज्योतिषशास्त्र अध्ययनेनैव भवति। शास्त्रमिदं कालविधानशास्त्रत्वेन महत्वं समावहति। अस्य शास्त्रस्य कर्तारः तावत् अष्टादशसंख्याकाः वर्तन्ते ते। च यथा-

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिपराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः॥
लोमशः पौलशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशाह्येते ज्योतिःशास्त्रप्रवर्तकाः॥

इत्येते अष्टादशसंख्याकाः महर्षयः ज्योतिषशास्त्रकर्तृत्वेन प्रसिद्धाः भवन्ति। ग्रन्थाः स्तावत्-

| | | |
|---|---|---|
| आर्यसिद्धान्तः - | महाभास्करीयम्- | पञ्चसिद्धान्तिका |
| गणितसारसंग्रहः - | कर्णतिलकम् - | सिद्धान्तशेखरः |
| ग्रहचिंतामणि : - | ग्रहकौमुदी - | सिद्धान्तमञ्जरी |
| पञ्चसिद्धान्तिका - | ज्योतिषार्णवः - | ज्योतिर्विज्ञानम् |
| विवाहकौमुदी - | चूडारत्नम् - | यवनजातकम् |
| होराशास्त्रम् - | सारावली - | जातकपद्धतिः |
| लग्नचन्द्रिका - | | |

इत्यादिग्रन्थाः नैकसंख्याकाः अद्योपलभ्यन्ते[१]।

## १.३.६. कल्पः

कल्प्यते कृतिसाध्यत्वेन इष्टसाधनत्वेन च यज्ञाद्यनुष्ठानादीनां विनियोगविध्यानुकूल्येन विधानं विधीयते अस्मिन् इति कल्पः [२]।

श्रौतस्मार्तादिकर्मकाण्डानां संविधानं ब्राह्मणादिग्रन्थेषु यथा उपलभ्यते यथा वर्गीकृतानुगतरूपेण अभिज्ञानार्थं कल्पग्रन्थाः समुद्धिष्टाः सन्ति।

कल्पस्तावत् भारतीयानां धर्मनीतिजीवनविधानं सर्वं सम्पूर्णं जीवनं श्रौतस्मार्तादिविधानैः अनुशासितं भवति। वर्णधर्म - आश्रमधर्म - संस्कार - यागविधान- अनुलोम-प्रतिलोमादीनां जननविधानं सर्वं कल्पसूत्रे विस्तृतम् उपदिश्यते [३]।

## १.३.६.१. कल्पसूत्रस्वरूपम्

कल्पसूत्रे मानवशरीरस्य मनसश्च संस्करणविधानं, पवित्रत्वापादनार्थं वंशस्य तस्य जनस्य स्वस्य च चतुर्विधफलपुरुषार्थसाधनार्थं भगवदनुग्रहप्राप्त्यर्थं च श्रेयःप्रेयोमार्गानुसरणार्थं च ये मार्गाः सन्ति तान् सर्वान् अत्र ऋषिमुखेन उपदिष्टाः समभूवन्।

---

१. सं.वा. सं.सा.इ.

२. सं.वा.

३. क.सू.

गर्भाधान - पुंसवन - सीमन्त - विवाह - अन्त्येष्टिरूपाणां संस्काराणां विधिविधानं पञ्चमहायज्ञस्वरूपं पाक - हविः- सोमयज्ञानाम् आचरणविधानं तेषां मन्त्राः सुस्पष्टं साङ्गोपाङ्गं सश्रद्धं च उपदिश्यन्ते अयमेव कल्पसूत्रस्य उपदेशसारः।

वेदशाखानुसारं कल्पसूत्रं बहुविधं भवति। तच्चसूत्रं विषयानुरोधेन पञ्चविधं भवेत्। तानि च श्रौत - धर्म - गृह्य - शुल्ब - प्रवररूपाणि भवन्ति[१]। तत्र आदौ-

### १.३.६.२. श्रौतसूत्राणि

श्रुत्युक्तगार्हपत्य-अन्वाहार्य-आहवनीयानाम् अग्नीनां संस्थापनम्, दर्शपूर्णमास - चातुर्मास्य - अग्निष्टोम - अत्यग्निष्टोम - वाजपेय - सोमयागादीनां साङ्गोपाङ्गं विधिविधानं तद्विषयकसमस्तनियमादीनां च विवरणं श्रौतसूत्रेषु च समुपलभ्यते[२]।

### १.३.६.३. धर्मसूत्राणि

वेदोक्तधर्माणां विवरणं नित्यनैमित्तिककर्तव्यानां विधानं नित्यकर्मणां तेषाम् आचाराणां च विधिः पालन-संरक्षणात्मकराजव्यवहाराणां स्वरूपं सामान्यधर्मविधानं च वैशिष्ट्येन कृतमुपलभ्यते अस्मिन् धर्मसूत्रे।

### १.३.६.४. गृह्यसूत्राणि

ब्राह्मण - क्षत्रिय - वैश्यानां नित्यनैमित्तिककाम्यकर्माणां

---

१. सं.वा.

२. आ.वा.च.

विवरणं गर्भाधान - पुंसवन - सीमन्तोन्नयन - जातकर्म-कर्णवेध - विद्यारम्भ - उपनयन - वेदारम्भ - केशान्त - समावर्तन - विवाह - अन्त्येष्टिरूपाणां संस्काराणां विधानं च विहितमस्मिन् गृह्यसूत्रे।

### १.३.६.५. शुल्बसूत्राणि

पाक - हविः- सोमयज्ञानां समाचरणे यज्ञवेदी - कुण्ड मण्डपादीनां निर्माणविधानम् एतन्निर्माणे इष्टिकादीनां स्वरूपलक्षणादिविधानं च अङ्गुलविधानेन मानादीनां विवरणमपि विहितमभ्युपगम्यते अस्मिन् शुल्बसूत्रे।

### १.३.६.६. प्रवरसूत्राणि

गोत्रप्रवरविधानं ऋषीणां संख्यानियमः तेषां नामानि च स्पष्ठमुपलभ्यन्ते प्रवरसूत्रे।

### १.३.६.७. शाखान्तर्गतानि कल्पसूत्राणि

ऋग्यजुस्सामाथर्वणरूपेण विभक्तस्य वेदवाङ्मयस्य बहूनि शाखाभेदानि वर्तन्ते अपि एकैकस्याः वेदशाखायाः निर्दिष्टाणि सूत्राणि कानिचन वर्तन्ते इति वेदवाङ्मयस्य उपदेशसारः। यस्याः शाखायाः यानि सूत्राणि सन्ति तान्यत्र श्रौत -गृह्य- धर्म - प्रवर - शुल्बाणाम् अंशानामाधारेण सूत्राणां विवरणपट्टिका विदुषां महते उपकाराय मया अत्र दीयते-

शाखान्तर्गतसूत्राणां पट्टिका[१]।

---

१. सं.वा. सं.वा.बृ.इ. सं.सा.इ.

## १.३.६.८. श्रौतसूत्रपट्टिका

### श्रौतसूत्रम्

| ऋग्वेदः | कृष्णयजुर्वेदः | शुक्लयजुर्वेदः | सामवेदः | अथर्ववेदः |
|---|---|---|---|---|
| १. आश्वलायनश्रौतसूत्रम् | १. मानवश्रौतसूत्रम् | १. कात्यायनश्रौतसूत्रम् | १. आर्षेयश्रौतसूत्रम् | १. आङ्गिरसश्रौतसूत्रम् |
| २. शांखायनश्रौतसूत्रम् | २. मैत्रायणीयश्रौतसूत्रम् | २. बैजवश्रौतसूत्रम् | २. लाट्यायनश्रौतसूत्रम् | २. वैतानश्रौतसूत्रम् |
| ३. कौषीतकश्रौतसूत्रम् | ३. काठकश्रौतसूत्रम् | | ३. द्राह्यायणश्रौतसूत्रम् | |
| | ४. आपस्तम्बश्रौतसूत्रम् | | ४. जैमिनीयश्रौतसूत्रम् | |
| | ५. हिरण्यकेशीयश्रौतसूत्रम् | | ५. क्षुद्रश्रौतसूत्रम् | |
| | ६. बौधायनश्रौतसूत्रम् | | | |
| | ७. भारद्वाजश्रौतसूत्रम् | | | |
| | ८. वैखानसश्रौतसूत्रम् | | | |
| | ९. वाराहश्रौतसूत्रम् | | | |
| | १०. वाधूलश्रौतसूत्रम् | | | |

## १.३.६.९. गृह्यसूत्रपट्टिका

### गृह्यसूत्रम्

| ऋग्वेदः | कृष्णयजुर्वेदः | शुक्लयजुर्वेदः | सामवेदः | अथर्ववेदः |
|---|---|---|---|---|
| १. आश्वलायनगृह्यसूत्रम् | १.मानवगृह्यसूत्रम् | १. कात्यायनगृह्यसूत्रम् | १. आर्षेयगृह्यसूत्रम् | १. आङ्गिरसगृह्यसूत्रम् |
| २. शांखायनगृह्यसूत्रम् | २. मैत्रायणीयगृह्यसूत्रम् | २. बैजवगृह्यसूत्रम् | २. खादिरगृह्यसूत्रम् | २. कौशिकगृह्यसूत्रम् |
| ३. कौषीतकगृह्यसूत्रम् | ३. काठकगृह्यसूत्रम् | ३. लौगाक्षिगृह्यसूत्रम् | ३. द्राह्यायणगृह्यसूत्रम् | |
| ४. कौनकगृह्यसूत्रम् | ४. वराहगृह्यसूत्रम् | ४. गोभिलीयगृह्यसूत्रम् | ४. जैमिनीयगृह्यसूत्रम् | |
| ५. पराशरगृह्यसूत्रम् | ५. आपस्तम्बगृह्यसूत्रम् | ५. पारस्करगृह्यसूत्रम् | ५. कौथुमगृह्यसूत्रम् | |
| ६. भारवीयगृह्यसूत्रम् | ६. हिरण्यकेशीयगृह्यसूत्रम् | ६. शाण्डिल्यगृह्यसूत्रम् | ६. कौशिकगृह्यसूत्रम् | |
| ७. शाकल्यगृह्यसूत्रम् | ७. सत्याषाढगृहस्यसूत्रम् | ७. माविलगृह्यसूत्रम् | ७. गोभिलगृह्यसूत्रम् | |
| ८. पैङ्गिगृह्यसूत्रम् | ८. भारद्वाजगृह्यसूत्रम् | | ८. गौतमगृह्यसूत्रम् | |
| ९. बहूवृथगृह्यसूत्रम् | ९. वैखानसगृह्यसूत्रम् | | ९. छान्दोग्यगृह्यसूत्रम् | |
| १०. ऐतरेयगृह्यसूत्रम् | १०. वाधुलगृह्यसूत्रम् | | | |
| | ११. अग्निवेश्यगृह्यसूत्रम् | | | |
| | १२. कपिष्ठलगृह्यसूत्रम् | | | |

## १.३.६.१०. धर्मसूत्रपट्टिका

### धर्मसूत्रम्

| ऋग्वेदः | कृष्णयजुर्वेदः | शुक्लयजुर्वेदः | सामवेदः | अथर्ववेदः |
| --- | --- | --- | --- | --- |
| १. वाशिष्ठधर्मसूत्रम् | १. मानवधर्मसूत्रम् | १. कात्यायनधर्मसूत्रम् | १. आर्षेयधर्मसूत्रम् | १. आङ्गिरसधर्मसूत्रम् |
| | २. आपस्तम्बधर्मसूत्रम् | २. शङ्खलिखितधर्मसूत्रम् | २. गौतमधर्मसूत्रम् | |
| | ३. हारीतधर्मसूत्रम् | | | |
| | ४. बौधायनधर्मसूत्रम् | | | |
| | ५. वैखानसधर्मसूत्रम् | | | |
| | ६. हिरण्यकेशीयधर्मसूत्रम् | | | |

### १.३.६.११. प्रवरसूत्रपट्टिका

**प्रवरसूत्रम्**

**ऋग्वेदः**

१. आश्वलायनप्रवरसूत्रम्

**कृष्णयजुर्वेदः**

१. आपस्तम्बप्रवरसूत्रम्
२. बौधायनप्रवरसूत्रम्
३. वैखानसप्रवरसूत्रम्
४. सत्याषाढप्रवरसूत्रम्
५. मानवप्रवरसूत्रम्
६. वाराहप्रवरसूत्रम्

**शुक्लयजुर्वेदः**

१. कात्यायनप्रवरसूत्रम्

### १.३.६.१२. शुल्बसूत्रपट्टिका

**शुल्बसूत्रम्**

| ऋग्वेदः | कृष्णयजुर्वेदः | शुक्लयजुर्वेदः | सामवेदः | अथर्ववेदः |
|---|---|---|---|---|
| १. शांखायनशुल्बसूत्रम् | १.मानवशुल्बसूत्रम् | १.कात्यायनशुल्बसूत्रम् | १.आर्षेयशुल्बसूत्रम् | १. आङ्गिरसशुल्बसूत्रम् |
| | २. आपस्तम्बशुल्बसूत्रम् | | | |
| | ३. बौधायनशुल्बसूत्रम् | | | |
| | ४. हिरण्यकेशीयशुल्बसूत्रम् | | | |
| | ५. मैत्रायणीयशुल्बसूत्रम् | | | |
| | ६. वाराहशुल्बसूत्रम् | | | |

## १.३.७. श्रीवैखानसकल्पसूत्रम्

कृष्णयजुर्वेदतैत्तिरीयशाखासम्बद्धं श्रीवैखानस-कल्पसूत्रम् एकं विद्यते। इदं श्रीविखनोमुनिना उपदिष्ठम् इति इदमेवसूत्रं वैखानसागमस्य भृगु - मरीचि- अत्रि-कश्यपानां चतुर्णाम् ऋषीणां च आधारभूतं भवतीति इदं वैखानसागमस्य च मातृरूपमिति दैविकसूत्रेषु आदिमं च भवेत् इति च वैखानसाः वैखानसागमानुयायिनः आगमविद्वांसश्च भावयन्ति[१]।

---

१. वैखा.

श्रीभग. वि. उपो.

# द्वितीयोऽध्यायः

## वैखानसागमपरिचयः

### २.१. आगमः

आगम्यते प्रमीयते हिताहितप्राप्तिपरिहारौ अनेन।

सृष्टिश्च प्रलयश्चैव देवानां च तथार्चनम्
साधनंचैव सर्वेषां पुरश्चरणमेव च।
षट्कर्म साधनंचैव ध्यानयोगश्चतुर्विधः
सप्तभिर्लक्षणैर्युक्तं त्वागमं तद्विदो विदुः ॥[1]

अमुं ब्रह्माणं गमयतीति ।
आसमन्तात् गम्यन्ते व्युत्पाद्यन्ते अनेन इति ।
आसमन्तात् गमयति प्रापयति[2] ।

इत्यादिभिः निर्वचनैः ज्ञायते आगमःनाम सृष्टि - प्रलय - अर्चन -पुरश्चरण - ध्यान - योगादिभिः संयुक्तः अहितनिवारकः हितप्रापकः अज्ञाननिवारकः ज्ञानप्रबोधकग्रन्थसमुदायः एव विद्यते इति।

अयम् अनादिसम्प्रदायसिद्धगुरुशिष्यपरम्परोपदेशकक्रमागतशास्त्रसन्दर्भः भवतीति च ज्ञायते। निराकारस्य भगवतः

१. वाच. पृ. ६१८
२. आ.द.

साकारपरिकल्पने उद्दिष्टः साधनग्रन्थसमूहः आगमः भवति। अयं च आगमः देवताभेदेन बहुविधः भवेत्।[१]

## २.२. वैष्णवागमः

श्रीमन्नारायणः एव प्रधानदेवः। तस्य अर्चनमेव सर्वाभ्युदयसाधकम्। भगवान् परमात्मा पर - व्यूह - विभव - अन्तर्यामी -अर्चा इति पञ्चभिः भेदैः भिद्यत इति एतेषु अर्चास्वरूपस्य आश्रयणमेव सर्वजनहितश्रेयोदायकं भवतु इति च उपदिशति वैष्णवागमः।

वैष्णवागमः द्विविधः प्रधानतया पाञ्चरात्र - वैखानस इति। तत्र

### २.२.१. पाञ्चरात्रागमः

परमात्मा श्रीमन्नारायणः पञ्चसु रात्रिषु एकैकस्यां रात्र्याम् एकैकस्मै शाण्डिल्य - औपगायन - मौञ्जायन - कौशिक - भारद्वाजमुनिभ्यः उपदिष्टत्वात् अस्य शास्त्रस्य पाञ्चरात्रमिति नाम संगच्छते। अत्र रात्रं नाम अज्ञानं पञ्च नाम तन्नाशः। अज्ञाननाशकं ज्ञानप्रभोधकं यद् भवति तदेव पाञ्चरात्रम्। श्रीमन्नारायणेन उपदिष्टम् इदं बहुभिः ग्रन्थैः विराजितं भवतीति ज्ञायते[२]।

---

१. अभ्युदयनिःश्रेयसोपायाः आगमाः, डा. वेदान्तं श्रीविष्णुभट्टाचार्यः श्रुतिविवेचिनी, ति.ति.दे., धर्मगिरि, तिरुमला, २००८

२. पाञ्चरात्रागमानां विमर्शः - डॉ शीतलप्रसादपाण्डेयः शोधप्रभा-श्रीलालबहादूरशास्त्री, राष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली-२००८

## २.२.२. पाञ्चरात्रागमग्रन्थाः

पाञ्चरात्रगमग्रन्थाः बहवः विद्यन्ते अपि अधोनिर्दिष्टाः ग्रन्थाः प्रधानतया उपलब्धाश्च भवन्तीति ज्ञायते[१]। एते तावत्

| | |
|---|---|
| अगस्त्यसंहिता | पारमेश्वरसंहिता |
| अनिरुद्धसंहिता | पुरुषोत्तमसंहिता |
| अहिर्बुध्न्यसंहिता | पौष्करसंहिता |
| ईश्वरसंहिता | बृहद्ब्रह्मसंहिता |
| कपिञ्जलसंहिता | मार्कण्डेयसंहिता |
| काश्यपसंहिता | भारद्वाजसंहिता |
| जयाख्यसंहिता | लक्ष्मीतन्त्रम् |
| ज्ञानामृतसंहिता | विश्वामित्रसंहिता |
| नारदीयसंहिता | विष्णुतिलकसंहिता |
| परमसंहिता | विष्णुसंहिता |
| परमपुरुषसंहिता | विष्वक्सेनसंहिता |
| पराशरसंहिता | शाण्डिल्यसंहिता |
| पाद्मसंहिता | शेषसंहिता |
| श्रीप्रश्नसंहिता | सनत्कुमारसंहिता |
| सात्वतसंहिता | हयशीर्षसंहिता |

---

१. आ.द.

### २.२.३. वैखानसागमः

वैखानसागमः श्रुतिमूलकः। नैव प्रोच्यन्ते अत्र मण्डल - मुद्रा दीक्षादिक्रियाः। अस्मिन् वैखानसागमे सभ्य - आहवनीय - अन्वाहार्यादियज्ञकुण्डेषु पारमात्मिक - सर्वदैवत्य - वैष्णवमन्त्रैर्होमः, चतुर्वेदमन्त्रैः संयुक्तम् उपचारादिभिः अर्चनं च अत्र परिदृश्यते।

**श्रियः पतिः भगवान् विष्णुरेव परमं तत्त्वं तत्प्राप्तिरेव मोक्षः अमूर्तसमूर्तभेदेन द्विविधं भगवदर्चनं मोक्षोपायः । द्विविधे चास्मिन् भगवदर्चने द्वितीयं समूर्तार्चनं श्रेयः। समूर्तार्चनं चैतत् आलयार्चा गृहार्चाचेति द्विविधम्। तत्र आलयार्चा ज्यायसी** इति वैखानसागमग्रन्थेषु प्रतिपाद्यते।

परमात्मस्वरूपप्रितपादकः ज्ञानभागः, चित्तनैर्मल्य-निरूपणपरः योगभागः, आलयनिर्माण-बिम्बकल्पन - बिम्बप्रतिष्ठा-अर्चन - स्नपन - उत्सव - प्रायश्चित्तादिविवेचनपरः क्रियाभागश्च वैखानसागमे परिदृश्यते[१]।

#### २.२.३.१. वैखानसागमग्रन्थाः

भगवतः श्रीमन्नारायणस्य हृदयपुटात् संजातस्य

१. वै.वि.

श्रीविखनोमुनीन्द्रस्य उपदेशसर्वस्वम् एकं कल्पसूत्रं विद्यते। तदेव वैखानसकल्पसूत्रनाम्ना प्रसिद्धिमभूत्। सूत्रमिदं विखनोमुनीन्द्रस्य शिष्याणां भृगु, मरीचि, अत्रि, कश्यपानाम् आधारभूतः मूलग्रन्थः प्रधानाकरश्च भवति। वैखानसकल्पसूत्रस्य भृग्वादीनाम् ऋषीणां ग्रन्थसमूहस्य च स्वरूपं कीदृशमिति विचारयामः।

### २.२.३.२. वैखानसकल्पसूत्रम्

श्रीमद्विखनोमुनिप्रणीतं वैखानसकल्पसूत्रं सूत्ररूपेण विद्यते। सूत्राणि तावत् सुरुचिरपदगम्भीरैः सुललितैः मनोहरैः पदविशेषैश्च विद्यन्ते।

श्रीवैखानसकल्पसूत्रे चत्वारः भागाः विद्यन्ते गृह्यप्रवरधर्मश्रौतेति।

**तत्रगृह्यसूत्रे सप्तप्रश्नाः**
**धर्मसूत्रे त्रयःप्रश्नाः**
**प्रवरसूत्रे एको प्रश्नः**
**श्रौते तावत् एकविंशतिप्रश्नाश्च विद्यन्ते[१]।**

इदमेव कल्पसूत्रं भृगु - मरीचि - अत्रि - कश्यपानां प्रमाणभूतम् आधारभूतं च इति अधोनिर्दिष्टैः श्लोकैः अस्माभिः ज्ञातुं शक्यते[२] यथा-

---

१. श्री.वै.गृ.सू.

२. क्रिया २३, ८८-९१

**अथाग्नौ नित्यहोमान्ते सायं प्रातरतन्द्रितः।**
**विष्णोर्नित्यार्चनं कुर्यात्सर्वदेवार्चनन्तु तत् ॥**

**इति वैखानसे सूत्रे प्रोक्तं सङ्क्षेपतोऽर्चनम् ।**
**ऋषिभिस्तदुपन्यासो विस्तृतश्च समन्ततः॥**

**बहुप्रयोगो व्याख्यातो लोकानां हितकाम्यया।**
**काश्यपेनात्रिणा चैव मया चैव मरीचिना॥**

**सोऽयं तत्सूत्रमूलत्वाद्विधिर्वैखानसस्स्मृतः।**

एतत् वैखानसकल्पसूत्रं मनसि निधाय भृगु- मरीचि- अत्रि- कश्यपाश्चत्वारः ऋषयः क्रमेण अधिकार - संहिता - तन्त्र- काण्डनामभिः वैखानसागमग्रन्थाः विरचिताः अभवन् इति एतेषां ग्रन्थसंख्या चातुर्लक्षपरिमिता इति च उपदिश्यते वैखानसवाङ्मये। एतेषां ग्रन्थानां नामानि यथा[१]-

**२.२.३.३. भृगुमहर्षिग्रन्थाः**

| | |
|---|---|
| खिलम् | खिलाधिकारः |
| क्रियाधिकारः | निरुक्ताधिकारः |
| पुराधिकारः | वासाधिकारः |
| प्रकीर्णाधिकारः | याज्ञाधिकाराः इति । |

**२.२.३.४. मरीचिमहर्षिग्रन्थाः**

| | |
|---|---|
| आनन्दसंहिता | विजयसंहिता |
| विज्ञानसंहिता | वीरसंहिता |

१. आ.द.

जयसंहिता विजितसंहिता
विमलसंहिता संज्ञानसंहिता इति।

**२.२.३.५. अत्रिमहर्षिग्रन्थाः**

पूर्वतन्त्रम् विष्णुतन्त्रम्
उत्तरतन्त्रम् इति।

**२.२.३.६. कश्यपमहर्षिग्रन्थाः**

सत्यकाण्डः कर्मकाण्डः
ज्ञानकाण्डः इति।

एतेषु भृगु - मरीचि - अत्रि - कश्यपानां विरचितेषु ग्रन्थेषु

मरीचिमहर्षेः **आनन्दसंहिता - विमानार्चनकल्पौ**
(आनन्दसंहितायां अयुतरूपः विमानार्चनाकल्पः)

भृगुमहर्षेः **क्रियाधिकार-खिलाधिकार - यज्ञाधिकार-वासाधिकार - प्रकीर्णाधिकाराश्च**

कश्यपमहर्षेः **ज्ञानकाण्डः**

अत्रिमहर्षेः **समूर्तार्चनाधिकरणम्** (उत्तरतन्त्रान्तर्गतम्)

इत्येते नवग्रन्थाः अद्य मुद्रिताः उपलब्धाश्च। अन्ये च ग्रन्थाः नैव मुद्राप्यन्ते, नाम्ना एव उपलभ्यन्ते च।

**२.२.४. वैखानसागमग्रन्थस्वरूपः**

वैखानसागमग्रन्थास्तावत् विष्णोः आलयनिर्माण -

विष्णोः बिम्बकल्पन-विष्णोः प्रतिष्ठा-विष्णोः अर्चनस्नपनोत्सव-प्रायश्चित्ताः ज्ञानयोगाश्च विशेषतया उपदिश्यन्ते। तत्र

**अथातो मरीचिं मुनयः प्रणम्य चरितक्रिया-ज्ञानयोगेषु चतुर्षु पूजामार्गेषु चरितं भगवता विखनसा सूत्रे विस्तरेण प्रणीतम्। अन्यत्संक्षेपेणोक्तं तदुपन्यासो बहुप्रयोगक्रमेण क्रियामार्गस्त्वयाप्रणीतः। भगवत्तत्त्वज्ञानयोगं च श्रोतुमिच्छामः इत्ययाचन्त तान् समीक्ष्य श्रूयतामिति मरीचिरुवाच।**

इति मरीच्युक्तवचनानुसारेण वैखानसागमग्रन्थेषु सर्वेषु चरित - क्रिया - ज्ञान - योगाः इति चत्वारः पूजा मार्गाः सन्तीति ज्ञायते। तत्र ज्ञानमार्गे तत्त्वपदनिर्वचनं, निष्कलस्वरूपं, सकलस्वरूपं, वैकुण्ठस्वरूपं, देहोत्पत्तिप्रकारः जीवस्वरूपं, पाञ्चभौतिकप्रलयः, मोक्षस्वरूपम् इत्येते अंशाः विव्रियन्ते।

**योगमार्गे तावत्** यम - नियम - आसन - प्राणायाम -प्रत्याहार-ध्यान - धारण - समाधयः इति अष्टाङ्गयोगाः उपदिश्यन्ते।

**चरितमार्गे तावत्** निषेकादि अष्टादशसंस्काराः - आश्रमधर्माः- पाकयज्ञ - हविर्यज्ञ - सोमयज्ञाश्च साङ्गोपाङ्गं सश्रद्धम् उपवर्ण्यन्ते।

**क्रियामार्गे तावत्** भूपरीक्षा, ग्रामादीनांस्वरूपं, तरुणालयनिर्माणविधिः, शङ्कुस्थापनम्, विमानविधिः, प्राकारलक्षणं, गर्भन्यासविधिः, धृवबेरविधानं, शूलस्थापनविधिः

देवस्य वर्णवाहननिर्णयः, मत्स्यादि अवतारस्वरूपं, कौतुकादीनां लक्षणं, तालनिर्णयः, पात्रादीनां लक्षणं, प्रतिष्ठाविधिः, नित्यार्चनाप्रकारः, विशेषपूजाविधिः स्नपनविधिः, उत्सवविधिः, प्रतिष्ठा - अर्चन - स्नपन - उत्सवादि दोषाणां प्रायश्चित्तानि जीर्णबेरपरित्यागविधिः, शान्तिभेदाः पवित्रोत्सवः इत्यादीनाम् अंशानाम् उपदेशः तेषां विवरणं च समुपलभ्यन्ते।

अयमेव वैखानसागमग्रन्थस्वरूपः[१]।

### २.२.५.श्रीवैखानसागमसम्बद्धाः आलयाः

आलयनिर्माणविग्रहप्रतिष्ठादिकं वेदमार्गेण उपदिशन्तः वैखानसागमप्रोक्त अर्चना - स्नपन-उत्सव - प्रायश्चित्तादिविशेषाः ये सन्ति ते सर्वे ग्राम अग्रहार - नगर - पट्टणादिषु च सर्वत्र अनुष्ठानरूपेण वंशपारम्पर्यविधानेन आचार्यमुखेन च लोके राराजन्तीति ज्ञायते।

अर्चन - स्नपन- उत्सव - विशेषपूजादिकं सर्वम् अर्चास्वरूपस्य श्रीमन्नारायणस्य यजनव्यापाररूपोपचारादिकं भवति। तदेव तिरुमलक्षेत्रे विराजमानस्य श्री श्रीनिवासस्य सन्निधौ आरभ्य ग्रमादिपट्टणपर्यन्तं देशे विविधेषु कोणेषु विराजमानेषु दिव्यालयेषु सर्वत्र अनुष्ठानरूपेण वैदिकेन मार्गेण विलसतीति स्पष्टतमोऽयमंशः।

---

१. वैखा.
क्रिया. उपो

कस्मिन् प्रान्ते कस्मिन् आलये अयं च वैखानससम्प्रदायः प्रचलतीति पट्टिकारूपेण मया अत्र आगमजिज्ञासूनाम् उपकाराय समालोचनाय च दीयते तद्यथा-

| क्र.सं. | मूर्तिनाम | स्थानम् | देशः |
|---|---|---|---|
| १. | श्रीवेङ्कटेश्वरस्वामी | तिरुमल | आन्ध्रदेशः |
| २. | श्रीगोविन्दराजस्वामी | तिरुपतिः | आन्ध्रदेशः |
| ३. | श्रीकोदण्डरामस्वामी | तिरुपतिः | आन्ध्रदेशः |
| ४. | श्रीप्रसन्नवेङ्कटेश्वरस्वामी | अप्पलायगुण्टा | आन्ध्रदेशः |
| ५. | श्रीकरिमाणिक्यस्वामी | नगरि | आन्ध्रदेशः |
| ६. | श्रीवेणुगोपालस्वामी | कार्वेटिनगरम् | आन्ध्रदेशः |
| ७. | श्रीकल्याणवेङ्कटेश्वरस्वामी | नारायणवनम् | आन्ध्रदेशः |
| ८. | श्रीवेदनारायणस्वामी | नागलापुरम् | आन्ध्रदेशः |
| ९. | श्रीज्वालानरसिंहस्वामी | वेदाद्रि | आन्ध्रदेशः |
| १०. | श्रीकल्याणवेङ्कटेश्वरस्वामी | श्रीनिवासमङ्गापुरम् | आन्ध्रदेशः |
| ११. | श्रीलक्ष्मीनरसिंहस्वामी | मङ्गलगिरिः | आन्ध्रदेशः |
| १२. | श्रीभावनारायणस्वामी | पोन्नूरु | आन्ध्रदेशः |
| १३. | श्रीभावनारायणस्वामी | बापट्ल | आन्ध्रदेशः |
| १४. | श्रीवेङ्कटेश्वरस्वामी | द्वारकातिरुमल | आन्ध्रदेशः |
| १५. | श्रीलक्ष्मीकान्तस्वामी | कावलि | आन्ध्रदेशः |
| १६. | श्रीलक्ष्मीनरसिंहस्वामी | सिंगरायकोण्डा | आन्ध्रदेशः |
| १७. | श्रीलक्ष्मीनरसिंहस्वामी | अन्तर्वेदि | आन्ध्रदेशः |
| १८. | श्रीनरसिंहस्वामी | मट्टपल्लि | आन्ध्रदेशः |

| | | | |
|---|---|---|---|
| १९. | श्रीवेङ्कटेश्वरस्वामी | गोरंट्ल-गुंटूरु | आन्ध्रदेशः |
| २०. | श्रीवेणुगोपालस्वामी | हंसलदीवि | आन्ध्रदेशः |
| २१. | श्रीश्रीकाकुळेश्वरस्वामी | श्रीकाकुळम् | आन्ध्रदेशः |
| २२. | श्रीयोगानन्दलक्ष्मीनरसिंहस्वामी | वेदाद्रि | आन्ध्रदेशः |
| २३. | श्रीवेणुगोपलस्वामी | मोव्व | आन्ध्रदेशः |
| २४. | श्रीवेङ्कटेश्वरस्वामी | नैमिशारण्यम् | उत्तरदेशः |
| २५. | श्रीवेङ्कटेश्वरस्वामी | रुषीकेश् | उत्तरदेशः |
| २६. | श्रीलक्ष्मीनारायणस्वामी | ममण्डूरू | तमिळदेशः |
| २७. | श्रीवेणुगोपालस्वामि | मन्नाडि, चेन्नै | तमिळदेशः |
| २८. | श्रीवैकुण्ठवासस्वामी | कोयंबेडु, चेन्नै | तमिळदेशः |
| २९. | श्रीआदिकेशवस्वामी | श्रीपेरम्बदूरू | तमिलदेशः |
| ३०. | श्रीवीराञ्जनेयस्वामी | मुलबागुल | कन्नडदेशः |
| ३१. | श्रीकोटावेङ्कटेश्वरस्वामी | बेंगुलुरु | कन्नडदेशः |
| ३२. | श्रीकोटावेङ्कटेश्वरस्वामी | कोलार् | कन्नडदेशः |
| ३३. | श्रीवेङ्कटरमणस्वामी | बेंगुलूरु | कन्नडदेशः |

## २.२.६. श्रीवेङ्कटाद्रिदिव्यक्षेत्रस्वरूपम्

श्रीमन्नारायणः वैकुण्ठलोकं परित्यज्य भक्तानुकम्पया श्रीवेङ्कटाद्रिदिव्यक्षेत्रे परमपवित्रप्राङ्गणे मुनि-ऋषि-तापसादिभिः परिवृते आनन्दनिलयदिव्यविमाने स्वयंव्यक्तरूपेण आगत्य प्रविराजतीति वेद -स्तोत्र - काव्य- चरित्रग्रन्थानाम् आध्यात्मिकानां चारित्रकाणां परिशोधकानां च विश्वासः।

असौ तावत्-

श्रीवैकुण्ठविरक्ताय स्वामिपुष्करिणीतटे।
रमया रममाणाय वेङ्कटेशाय मङ्गलम् ॥[१]

इत्युक्तरीत्या साक्षात् श्रीमन्नारायण एव भवति।

ध्रुव - कौतुक - स्नपन - उत्सव - बलि इति पञ्चभिः बेरविशेषैः श्रीराम - श्रीकृष्ण - सुदर्शन - अनन्त - गरुड - विष्वक्सेनादिभिश्च राराजमानोऽयं आनन्दनिलयनाथः

अरायिकाणे विकटे गिरिं गच्छ सदान्वे।
शिरिं बिठस्य सत्त्वभिः तेऽभिष्ट्वा चातयामसि॥
इति श्रुत्युक्तरीत्या[२]

ऐश्वर्यहीनस्य भाग्यप्रदः, अमङ्गलस्य मङ्गलदाता, सर्वपापप्रणाशनरूपः, अखिलहेयप्रत्यनीककल्याणगुणाकरः सर्वोत्कृष्टश्च इति ज्ञायते अस्माभिः।

वैखानसप्रशंसमानपञ्चविधव्यूहसार्थकीकरण दिव्यवैभवोद्भासितः स च परमात्मा अर्चारूपेण श्रीवेङ्कटाद्रौ दिव्याभरण-दिव्यपरिजन - दिव्यगन्ध - दिव्यपुष्प - दिव्यसौकुमार्य-दिव्यलावण्यातिशयेन राराजतीति वक्तुं मे चेतः आनन्दमनुभवति।

---

१. श्रीवेङ्कटेश्वरसुप्रभातमङ्गलाशासनम् श्लो. -१२

२. ऋ.सं. १०-१५५-१

आध्यात्मिकसमुन्नतेः साधनस्य दिव्यभव्यमार्गः श्रीवेङ्कटपर्वतः। स च सर्वेषाम् आस्तिकानाम् आर्षजिज्ञासूनां च दिव्यभव्यमङ्गलसाफल्यप्रदायकश्च इति च वक्तुं नास्ति संशीतिः।

तस्य श्रीमन्नारायणस्य दिव्यसन्निधौ वैखानसागमशास्त्रोक्तरीत्या पूजादिकमपि सर्वं प्रचलति[२] च।

## २.२.७. श्रीवेङ्कटाचलक्षेत्रे नित्यनैमित्तिककाम्योत्सवाः

श्रीवेङ्कटाचलक्षेत्रे विद्यमानस्य आनन्दनिलयदिव्यविमानछायायां प्रविरजमानस्य अखिलाण्डकोटिब्रह्माण्डनायकस्य नित्य-वार - मास - पक्ष - नक्षत्र-संवत्सर उत्सवाः नैक संख्याकाः प्रचलन्तीति सर्वजनविदितोऽयं विषयः। तेच उत्सवाः[३] पट्टिकारूपेण मयाऽत्र विलिख्यन्ते।

| क्रमसंख्य | उत्सवः | समयः | आह्निकविधानम् |
|---|---|---|---|
| १. | कल्याणोत्सवः | प्रतिदिनं मध्याह्नकालः | - |
| २. | वसन्तोत्सवः | प्रतिदिनं मध्याह्नकालः | - |
| ३. | आर्जितब्रह्मोत्सवः | प्रतिदिनं मध्याह्नकालः | - |
| ४. | डोलोत्सवः | प्रतिदिनं सायंकालः | - |
| ५. | षट्कालपूजा | प्रतिदिनं षट्सु कालेषु | - |
| ६. | विशेषपूजा | सोमवासरः | - |
| ७. | स्वर्णपुष्पार्चनम् | मङ्गलवासरः | - |
| ८. | सहस्रकलशस्नपनम् | बुधवासरः | - |

१. ज्ञान. उपो.

१. श्रीवे.वै.

| | | | |
|---|---|---|---|
| ९. | तिरुप्पावडा | गुरुवासरः | - |
| १०. | विशेषस्नपनम् | शुक्रवासरः | - |
| ११. | वसन्तोत्सवः | चैत्रमासे | त्र्याह्निकदीक्षा |
| १२. | पद्मावतीपरिणयोत्सवः | वैशाखमासे | त्र्याह्निकदीक्षा |
| १३. | ज्येष्ठाभिषेकः | ज्येष्ठमासे | त्र्याह्निकदीक्षा |
| १४. | पवित्रोत्सवः | श्रावणमासे | त्र्याह्निकदीक्षा |
| १५. | ब्रह्मोत्सवः | कन्यामासे | नवाह्निकदीक्षा |
| १६. | नवरात्रिब्रह्मोत्सवः | आश्वयुजमासे | नवाह्निकदीक्षा |
| १७. | पुष्पयागः | कार्तीकमासे | एकाह्निकदीक्षा |
| १८. | प्लवोत्सवः | फाल्गुणमसे | पञ्चाह्निकदीक्षा |

# तृतीयोऽध्यायः

## श्रीवैखानसकल्पसूत्रपरिचयः

### ३.१. श्रीवैखानसकल्पसूत्रम्

वैखानसकल्पसूत्रं तावत् दैविकं वैदिकं शब्दप्रमाणमात्रं श्रुतिमार्गानुसारं च भवतीति विद्वद्भिः निर्धार्यते। सूत्रं च इदं साङ्गक्रियाकलापवत्वं मन्वाद्यैः संग्राह्यम् अत्यन्तं प्राचीनतममिति च निर्धार्यते। इदं सूत्रं कुत्र कुत्र प्रचुरितं ? कस्याः संस्थायाः प्रकाशितमिति? परिशीलयामः।

| | |
|---|---|
| 1927 तमे वर्षे | W.CALAND सम्पादकत्वेन Royal institute Society, Bangal द्वारा |
| 1944 तमे वर्षे | DEEVI Krishna Bhattacharya सम्पादकत्वेन Vaikhanasagranthamala Yedlapalli, A.P. द्वारा |
| 1960 तमे वर्षे | Vaikhanasa Granthamandali, Ponnur,A.P. द्वारा |
| 1976 तमे वर्षे | Tirumala Tirupati Devasthanams, Tirupati,A.P. द्वारा |

| | |
|---|---|
| 1973 तमे वर्षे | Krishnaveni Granthamala, Uyyoor, A.P. द्वारा |
| 1984 तमे वर्षे | Sri Vaikhanasa Maha Mandali, Vijayawada, A.P. द्वारा |
| 1988 तमे वर्षे | Sri Vedantanilaya Publications, Appikatla, A.P. द्वारा |
| 2005 तमे वर्षे | Sri Vaikhanasa Trust, Tirumala, A.P. द्वारा |

देवनागरिलिप्याम्, आन्द्रलिप्यां च मुद्रितमिदं स्मार्तधर्मप्रवरश्रौतेति चतुर्भिः भागैः समलंकृतं विष्णुपारम्यं परमवैष्णवं च भवतीति वक्तुं नास्ति संशीतिलेशः।

श्रीवैखानससूत्रं स्मार्त - धर्म - प्रवर - श्रौत इति चतुर्भिः भागैः विराजितमिति एतेषु चतुर्षु भागेषु प्रश्नाः खण्डाः सूत्राणि च बहूनि विद्यन्ते। एतान् ज्ञानपिपासूनां सौकार्याय समालोचितुम् इच्छामि[१]।

### ३.१.१. श्रीवैखानसगृह्यसूत्रम्

वैखानसगृह्यसूत्रं सप्तप्रश्नात्मकं भवति। सूत्रमिदं ७३५ सूत्रैः १२० खण्डैश्च सहितो विद्यते। तद्यथा-

---

१. श्री वै.गृ.सू.
श्री. वै. श्रौ.सू.

| प्रश्नाः | खण्डाः | सूत्रसंख्या |
|---|---|---|
| १ | २१ | १८० |
| २ | १८ | १४९ |
| ३ | २३ | २३० |
| ४ | १४ | १३९ |
| ५ | १५ | २५४ |
| ६ | २० | १६८ |
| ७ | ९ | ७५ |
| | १२० | ७३५ |

सप्तसु सूत्रेषु उपदिष्टाः अंशाः के? के? इति विचार्यन्ते चेत्-

**प्रथमप्रश्ने** निषेकादिसंस्काराः, संध्यावन्दनं, पुण्याहम्,आघारम्, सामान्यक्रियाहोममन्त्राः, अन्तहोमः इत्यादयः

**द्वितीयप्रश्ने** नान्दीमुखम्, उपनयनम्, आषाढोपाकर्म समावर्तनम्, प्राणाग्निहोत्राविधानम् इति

**तृतीयप्रश्ने** विवाहभेदाः, पाणिग्रहणप्रकारः, चतुर्थीवासः, वैश्वदेवं, बलिहरणं, निषेकादि अष्टादशसंस्काराः, वास्तुहोमः वर्षवर्धनादीनि च

| | |
|---|---|
| चतुर्थप्रश्ने | स्थालीपाकम्, आग्रायणं, पिण्डपितृयज्ञः, विष्णुप्रतिष्ठा,नित्यार्चनं ग्रहशान्त्यादीनि च |
| पञ्चमप्रश्ने | दहनविधिः |
| षष्ठप्रश्ने | निषेकादीनां प्रयाश्चित्ताः, जातकाग्नौ समुत्सन्ने प्रायश्चित्तः, सन्ध्योपासनहीने प्रायश्चित्तः समावर्तनक्रियाहीने प्रायश्चित्तः, निषेकसंस्कारहीने प्रायश्चित्तः, पिण्डपितृयज्ञे मासिश्राद्धे हीने प्रायश्चित्तः,विष्णोर्नित्यार्चनाहीने प्रायश्चित्ताश्च |
| सप्तमप्रश्ने | संस्कारविभागः, मृतसंस्कारकर्तुः फलम्, सगर्भायाः मरणे अशौचनिर्णयः संवत्सरमध्ये सपिण्डीकरणत्वनिर्णयः, विच्छिन्न औपासनकाले मरणे प्रायश्चित्ताश्च प्रतिपाद्यन्ते। |

### ३.१.२. श्रीवैखानसधर्मसूत्रम्

श्रीवैखानसधर्मसत्रं तावत् प्रश्नत्रयात्मकं भवति। सूत्रमिदं ४७७ सूत्रैः ४१ खण्डैश्च सहितो विद्यते। तद्यथा-

| प्रश्नाः | खण्डाः | सूत्रसंख्या |
|---|---|---|
| ८ | ११ | ११३ |
| ९ | १५ | १३१ |
| १० | १५ | २३३ |
| | ४१ | ४७७ |

त्रिषु सूत्रेषु उपदिष्टाः अंशाः के? के? इति विचार्यन्ते चेत्-

**अष्टमप्रश्ने** वर्णाश्रमधर्माः, आश्रमभेदाः, ब्रह्मचारिभेदाः धर्माश्च, गृहस्थभेदाः,वानप्रस्थधर्माः भेदाश्च, श्रामणिकाग्निकुण्डप्रमाणम् वर्णभेदेन आश्रमनिर्णयः इत्यादयः।

**नवमप्रश्ने** श्रामणिकविधानं, सन्यासाश्रमक्रमः, प्राणायामलक्षणं,सावित्रीजपसंख्या, सामान्यधर्मादयाः

**दशमप्रश्ने** गृहस्थधर्माः, शुद्धिनिर्णयः, भिक्षुकधर्माः, आहिताग्नि -अनाहिताग्न्योर्मरणे कर्तव्यं, नारायणबलिः, चातुर्वर्ण्यसङ्करोत्पन्न-कथनप्रतिज्ञादयः उपवर्ण्यन्ते।

**३.१.३. श्री वैखानसप्रवरसूत्रम्**

वैखानसप्रवरसूत्रे एक एव प्रश्नः भवति।

सूत्रमिदं ६१ सूत्रैः ८ खण्डैश्च विद्यते। तद्यथा-

| प्रश्नः | खण्डाः | सूत्रसंख्याः |
|---|---|---|
| ११ | ८ | ६१ |

अस्मिन् प्रवरसूत्रे उपदिष्टाः अंशाः के? के? इति विचार्यन्ते चेत्।

**एकादशप्रश्ने** गोत्रप्रवरनिर्णयः, विश्वामित्र -भारद्वाज-गौतमादीनां गणाः, क्षत्रियप्रवरनिर्णयः, वैश्यप्रवरनिर्णयः एव समुपलभ्यन्ते।

### ३.१.४.श्रीवैखानसश्रौतसूत्रम्

श्रीवैखानसश्रौतसूत्रं तावत् एकविंशतिप्रश्नात्मकं भवति। सूत्रमिदं ४,८६४ सूत्रैः ३७८ खण्डैश्च सहिते विद्यतो। तद्यथा-

| प्रश्नाः | खण्डाः | सूत्राणां संख्या |
|---|---|---|
| १ | २० | २६० |
| २ | ११ | १३५ |
| ३ | ०९ | ११५ |
| ४ | १२ | १२२ |
| ५ | ०९ | १०५ |
| ६ | १२ | १०१ |
| ७ | १४ | १४३ |
| ८ | १४ | १७२ |

| | | |
|---|---|---|
| ९ | १२ | १६४ |
| १० | २२ | १६४ |
| ११ | ११ | १२८ |
| १२ | २४ | ३७२ |
| १३ | १८ | २६१ |
| १४ | २० | २३२ |
| १५ | ३८ | ४५१ |
| १६ | २८ | ३३८ |
| १७ | १८ | १७५ |
| १८ | २१ | ५०७ |
| १९ | ०८ | २७७ |
| २० | ३८ | ३८४ |
| २१ | १८ | १५४ |
| | ३७८ | ४,८६४ |

एकविंशतिप्रश्नेषु उपदिष्टाः अंशाः के? के? इति विचार्यन्ते चेत्-

**प्रथमप्रश्ने** अग्न्याधेयम्

**द्वितीयप्रश्ने** अग्निहोत्रम्

**तृतीय-चतुर्थ-पञ्चम-षष्ट-सप्तमप्रश्नेषु** दर्शपूर्णमासौ

**अष्मप्रश्ने** आग्रयणेष्टिः,

वरुणप्रघासः

चातुर्मास्यानि

**नवमप्रश्ने** निरूढपशुबन्धः

**दशमप्रश्ने**

| | |
|---|---|
| **एकादशप्रश्ने** | सौत्रामणी, जुह्वादिपात्रप्रमाणम् च |
| **द्वादशप्रश्ने** | अग्निष्टोमः |
| **त्रयोदशप्रश्ने** | प्रवर्ग्यः |
| **चतुर्दशप्रश्ने** | उपसत्कल्पः |
| **पञ्चदशप्रश्ने** | आग्नेयपशुसवनम् |
| **षोडशप्रश्ने** | अत्याग्निष्टोमः |
| **सप्तदशप्रश्ने** | उक्थी, षोडशी, अतिरात्रः, आप्तोर्यामः वाजपेयः |
| **अष्टादश, एकोनविंशतिप्रश्नयोः** | अग्निचयनम् |
| **विंशति, एकविंशतिप्रश्नयोः** | प्रायश्चित्ताश्च |

उपदिश्यन्ते।

### ३.१.५. श्रीवैखानसधर्मसूत्रभाष्याणि

वैखानसधर्मसूत्रमधिकृत्य भाष्यद्वयं मुख्यतया वर्तते। एकं श्रीश्रीनिवासदीक्षितैः लिखितं सूत्रतात्पर्यचिन्तामण्या व्याख्यया विद्यते। अन्यत् वाजपेययाजिभिः विरचितं भाष्यं वर्तते। भाष्यद्वयमेतत् वैखानसब्राह्मणानाम् आर्षजिज्ञासूनां वैदिकानां च कृते विज्ञानसर्वस्व इव भातीति नैव सन्देहलेशः।

### ३.२.श्रीवैखानसधर्मसूत्रे विशिष्टाः धर्माः

श्रीवैखानसधर्मसूत्रे बहवो विशिष्टाः धर्माश्चः उपदिष्टाः। तान् अत्र परिशीलयामः

## ३.२.१. ब्रह्मचारिधर्मा[१]:

अनुक्तोऽपि स्वाध्यायनित्यकर्माण्याचरेत्। उष्णाम्बुस्नान दन्तधावन अंजनानुलेपन गन्ध पुष्पोपान छत्र दिवास्वाप रेतस्कन्द स्त्री दर्शन स्पर्शन मैथुन काम क्रोध लोभ मोह मद मात्सर्य हिंसादीनि वर्जयित्वा सदा शुश्रूषुर्गुरोः प्रियहितकर्माणि कुर्वीत।

अद्वेषी वाक् चित्तानुकूलः प्रियं सत्यं वदति।
आर्तोऽप्यसत्यंऽप्रियं निन्दां नाचक्षीत।

मधुमांसमत्स्यरस शुक्ताद्यभोज्यभोजनवर्जी भैक्षाचरणंकृत्वा गुरुणानुज्ञातो भैक्षान्नमाश्नीयात्।

गुरुवृद्धदीक्षितानामाख्यां न बृयात्
गुर्वभावे तत्पुत्रे च गुरुवत्कर्माचरति।

## ३.२.२. वानप्रस्थधर्मा:[२]

मूलैः फलैः पत्रैःपुष्पैर्वा तत्तत्कालेन पक्वैः स्वयमेवसंशीर्णैः प्राणं प्रवर्तयन्नुत्तरोत्तरेऽप्यधिकं तपस्संयोगं फलाद्विशिष्टमाचरेत्।

---

१. श्री.वै.ध.८-२-२१ प्रभृति २५ सूत्राणि

२. ९-५-३६

३. १०-१-७ प्रभृति १३ सूत्राणि

३.२.३. गृहस्थधर्माः[३]

परदारान्नसङ्गच्छेत्।

परदारागमनादायुः श्रीर्ब्रह्मवर्चसं विनश्यति।

भार्यया सह नाश्नाति।

अश्नन्तीं तां जृम्भमाणां नग्नां च नावलोकयेत्।

असत्यवादं वर्जयति।

असत्यात्परं पापं तस्मात्परो धर्मश्च नास्ति।

सर्वप्राणिहितोऽद्रोहेणैव जीवेत्।

इत्यादयः विशिष्टाः धर्माः बहवो उपवर्ण्यन्ते अस्मिन् श्रीवैखानसधर्मसूत्रे।

# चतुर्थोऽध्यायः

## वैखानसधर्मसूत्रस्वरूपम्

धर्मः नाम अनाद्यविच्छिन्नसन्मार्गश्रेयोदायकश्रुतिमूलक - गुरूपदेशसन्दर्भः एव भवति। अपौरुषेये वेदे यत्कर्म विद्यते तस्य प्रतिपाद्यस्य प्रयोजनमेव अर्थो धर्मः।

**धर्मो विश्वस्य जगतः प्रतिष्ठा**[1]

**धर्मो रक्षति रक्षितः**[2]

**ध्रियते अनेन इति धर्मः**[3]

**धारणात् धर्म इत्याहुः**[4]

इति धर्मपदस्य निर्वचनानि नैकविधानि दृश्यन्ते।

धर्माः बहुविधाः भवन्ति वर्णधर्माः, आश्रमधर्माः, वर्णाश्रमधर्माः, गुणधर्माः निमित्तधर्माः इति। तत्र **वर्णधर्मः** नाम अष्टमे ब्राह्मणमुनयीत इत्यादि। **आश्रमधर्मः** नाम समिद्होमभैक्षाचर्यादिविधयः। **वर्णाश्रमधर्मः** नाम ब्राह्मणस्य पालाशो दण्ड इत्यादयः। **गुणधर्मः** नाम पाशुपाल्यादयः। **निमित्तधर्मः** नाम प्रायश्चित्तादयः भवन्ति[5]।

---

१. तैत्तरीय आरण्यकम् १०-६३

२. मनु. ८-१५

३. श्रीवैखानसधर्मसूत्रं उपो. (अनुवादम्)

४. महाभारतम् - उद्योगपर्वम् - ६२.५३

५. श्री वै.स्मा.सू.नृ.भा. पृ. ८५

## ४.१.वर्णाश्रमधर्माः

कस्य वर्णस्य कः धर्मः विद्यते? इति समालोचनं क्रियते चेत् ब्राह्मणस्य षट्, क्षत्रियस्य त्रयः, वैश्यस्य त्रयः, शूद्रस्य द्वावेव विधीयन्ते।

वैखानसधर्मसूत्रे[१] तावत् ब्राह्मणस्य अध्ययन - अध्यापन - यजन- याजन - दान - प्रतिग्रहाः इति षट् विधीयन्ते।

क्षत्रियवैश्ययोः तावत् यजन - अध्ययन - दानानि इति त्रीणि।

शूद्रस्य द्विजन्मनां शुश्रूषा कृषिश्च इति धर्माः उपदिष्टाः भवन्ति।

## ४.२. आश्रमभेदाः

ब्राह्मणस्य आश्रमभेदाः ब्रह्मचर्य - गार्हपत्य - वानप्रस्थ-भिक्षुरिति चत्वारः विद्यन्ते।

क्षत्रियस्य ब्रह्मचर्य - गार्हस्थ्य - वानप्रस्थ इति त्रयः निर्दिष्टाः भवन्ति।

---

१. तस्मात् ब्राह्मणस्याध्ययनाध्यापनयजनयाजनदानप्रतिग्रहाषट्कर्माणि भवन्ति। श्री.वै.ध.सू. ८-१-५

क्षत्रियवैश्ययोर्यजनाध्ययनदानानि। श्री.वै.ध.सू. ८-१-६

क्षत्रियस्य प्रजापालन दुष्टनिग्रह युद्धानि। श्री.वै.ध.सू. ८-१-७

वैश्यस्य पाशुपाल्य कुशीद वाणिज्यानि । श्री.वै.ध.सू.८-१-८

शूद्रस्य द्विजन्मनां शुश्रूषा कृषिश्चैव । श्री.वै.ध.सू. ८-१-९

वैश्यस्य ब्रह्मचर्य - गार्हस्थ्य इति द्वावेव विधीयेते इति वर्णाश्रमभेदाः वैखानसधर्मसूत्रे[1] सुस्पष्टं निरूप्यन्ते।

### ४.२.१. ब्रह्मचारी

ब्रह्मणि चरतीति ब्रह्मचारी। ब्रह्म वेदः तदध्ययनं चरतीति ब्रह्मचारी। गुरुकुले वेदवेदाङ्गाध्ययनविचारधारा अस्मिन् काले ब्रह्मचारी करोति। उपनयनानन्तरं निर्दिष्टान् धर्मान् सम्यक् अनुष्ठितस्सन् गुरुकुले वसति ब्रह्मचारी।

ब्रह्मचारिणः उपदिष्टाः ये धर्माः सन्ति तान्, ब्रह्मचारिभेदान् च वैखानसधर्मसूत्रानुसारेणैव[2] परिशीलयामः।

### ४.२.२. ब्रह्मचारिधर्माः

ब्रह्मचारी तावत् उपनीतस्सन् मेखल-उपवीत-अजिन-दण्डधारी सन् ब्रह्मयज्ञेन सह संध्योपासन-होम-गुरुशुश्रूषादीनि च करोति।

स च तावत् उष्णोदकस्नानदन्ताधावन अञ्जनानुलेपन पुष्पधारण स्त्रीणां दर्शन-स्पर्शन-मैथुन-काम-क्रोध-लोभ-मोह-

---

१. ब्राह्मणस्याश्रमाश्चत्वारः। श्री.वै.ध.सू. ८-१-१०
क्षत्रियस्याद्यास्त्रयः। श्री.वै.ध.सू. ८-१-११
वैश्यस्य द्वावेव । श्री.वै.ध.सू. ८-१-१२

१. उपनीतो ब्रह्मचारी मेखलोपवीताजिनदण्डधारी स्नात्वा तर्पणं ब्रह्मयज्ञं सायं प्रातस्संध्योपासन- समिद्धोमौच कुर्वन् गुरोः पादावुपसङ्गृह्य नित्याभिवन्दी व्रतेनाध्ययनं करोति। - श्री.वै.ध.सू.८-२-१४

मद-मात्सर्य-हिंसादीनि कर्माणि परित्यज्य सदा गुरोः शुश्रूषां च कुर्वन् तस्य प्रियहितकर्माणि करोति।

स च तावत् मधुमांसमत्स्यरसशुक्तादि अभोज्य-भोजनवर्जी भवति। गुरुणादिष्टस्सन् भैक्षान्नं प्राश्नाति।

तस्य गुरोः अभावे तस्य पुत्रस्य समीपे तं गुरुवत् मत्वा सञ्चरति।

इत्येते ब्रह्मचारिधर्माः वैखानसधर्मसूत्रं विशेषतया उपदिशति।

### ४.२.३. ब्रह्मचारिभेदाः

**ब्रह्मचारी**

**गायत्रः** **ब्राह्मः** **प्रजापत्यः** **नैष्ठिकः**

### ४.२.३.१. गायत्रब्रह्मचारी

गायत्रीमात्रमध्ययनमस्येति गायत्रः। गायत्रब्रह्मचारी तावत् उपनयनानन्तरं त्रिरात्रम् अक्षारलवणाशीसन् गायत्रीमधीत्य सावित्रव्रतसमाप्तिपर्यन्तं व्रतचारी भवति।

### ४.२.३.२.ब्राह्मब्रह्मचारी

ब्राह्मवेदमधीयतेऽनेनेति ब्राह्मः। ब्राह्मब्रह्मचारी तावत् सावित्रव्रतानन्तरं भैक्षाचरणं व्रताचरणं च कुर्वन्

द्वादशवर्षपर्यन्तं विंशतिवर्षपर्यन्तं वा गुरुकुले स्थित्वा सूत्रसहितवेदाध्ययनं करोति।

### ४.२.३.३.प्राजापत्यब्रह्मचारी

प्राजापतिर्नारायणो देवता अस्य ध्येयत्वेनेति प्राजापत्यः। प्राजापत्यब्रह्मचारी तावत् ब्रह्मचर्यशीलस्सन् नारायण-परायणो भूत्वा वेदवेदाङ्गार्थान् विचारयति।

### ४.२.३.४. नैष्ठिकब्रह्मचारी

निष्ठाब्रह्मचर्यमेवनियमो अस्येति नैष्ठिकः। नैष्ठिकब्रह्मचारी तावत् काषाय अजिन वल्कलधारीसन् जठी, मेखली, दण्डी, अक्षारलवणाशीसन् यावदात्मनो विप्रयोगः भवति, तावत्पर्यन्तं गुरुकुलेस्थित्वा भैक्षान्नं प्राश्नाति।

इति ब्रह्मचारिभेदाः वैखानसधर्मसूत्रे[१] विशेषतया विलक्षणतया च परिदृश्यन्ते।

### ४.३. गृहस्थः गृहस्थधर्माश्च

पाणिग्रहणसंस्कारसमनन्तरं गृहस्थः गृहस्थधर्मान् अनुसरति। गृहे तिष्ठतीति गृहस्थः। स च तावत् द्वे यज्ञोपवीते धृत्वा वैणवं दण्डं कमण्डलं च धारयति। स्नानादिनियमाचारस्सन् नित्यमौपासनं च कुर्वन् पाकयज्ञयाजी भूत्वा मनुष्ययज्ञेन अतिथीन्,

---

१. ब्रह्मचारिणश्चतुर्विधाः।
गायत्रो ब्राह्मः प्राजापत्यो नैष्ठिक इति। श्री.वै.ध.सू. ८,६-२६-२७

दयासत्यादिगुणैः ऋषीन्, पुत्रैश्च पितॄन्, जलैःपुष्पाद्यैश्च देवान् च अर्चयति इति वैखानसधर्मसूत्रे[1] विशेषतया गृहस्थधर्माः उपदिश्यन्ते।

गृहस्थः गृह्याग्नौ गार्ह्याणि कर्माणि, श्रौताग्निषु श्रौतानि च करोति।

**ऋतुरात्रिषु स्वभार्यामुपगच्छति।**

**भार्यया सह न अश्नाति।**

**असत्यवादं वर्जयति च।**

**गृहस्थस्तावत् सर्वप्राणिहितस्सन् अद्रोहेणैव जीवति इति वैखानसधर्मसत्रे[2] विशेषतया प्रतिपाद्यन्ते।**

**४.३.१. गृहस्थभेदाः**

गृहस्थस्तावत् कर्मानुरोधेन चतुर्विधः भिद्यते।

**गृहस्थः**

**वार्तावृत्तिः  शालीनवृत्तिः  यायावरः  घोराचारिकः**

**४.३.२. वार्तावृत्तिगृहस्थः**

अयं तावत् कृषिगोरक्षणवाणिज्योपजीवी च भवति।

**४.३.३. शालीनवृत्तिगृहस्थः**

शालीनवृत्तिगृहस्थस्तावत् पाकयज्ञैः संस्कृतस्सन् पर्वणि पर्वणि दर्शपूर्णमासयाजी भूत्वा चतुर्षु मासेषु चातुर्मास्ययाजी षट्सु मासेषु पशुबन्धयाजी प्रतिसंवत्सरं सोमयाजी च भवति।

**४.३.४. यायावरगृहस्थः**

यायावरगृहस्थस्तावत् षट्कर्मनिरतो भूत्वा अतिथीन् अभ्यागतान् च पूजयति।

**४.३.५. घोरचारिकगृहस्थः**

घोरचारिकगृहस्थस्तावत् यजन अध्ययन दानकर्माण्येव कुर्वन् नारायणपरायणस्सन् असिधाराव्रतेन ओषधीभिः अग्निपरिचरणं करोति इति गृहस्थभेदान् वैखानसधर्मसूत्रं[१] सम्यक् उपदिशति।

**४.४.१. वानप्रस्थः**

वने भगवत्साक्षात्कारार्थं यः तपः तप्तुं निवसति स एव वानप्रस्थः। वने प्रकर्षेण तिष्ठतीति वनप्रस्थः। तेन वर्तमानो वानप्रस्थः। वनं प्रस्थित इति वा वानप्रस्थः भवति। अयं मूलैः फलैः पत्रैः पुष्पैर्वा पक्वैः संशीर्णैश्च प्राणं प्रवर्तयन् उत्तरोत्तरे अधिकं तपस्संयोगं साधयितुं तपः आचरति ।

अस्य वानप्रस्थस्य धर्माः विशेषतया विलक्षणतया च सुष्ठु वैखानसधर्मसूत्रे सविस्तृतम् उपदिश्यन्ते।

---

१. गृहस्थाश्चतुर्विधाः।
वार्तावृत्तिश्शलीनवृत्तिर्यायावरो घोराचारिकश्चेति।
श्री.वै.ध.सू. ५,३७-३८

### ४.४.२. वानप्रस्थधर्माः

वानप्रस्थः गृहात् वनाश्रमं प्राप्य श्रामणकाग्निकुण्डे विशेषहोमं च करोति। रात्रौ न अश्नाति। जितेन्द्रियस्सन् उत्तरोत्तरे अधिकं तपस्संयोगं च साधयति। दर्शपूर्णमासौ चातुर्मास्यं नक्षत्रेष्टिम् आग्रयणेष्टिं च वनौषिधीभिः यजनं करोति।

अयं नित्यस्वाध्यायी सन् होमसम्भारान् सम्भरति।

कृष्टां भूमिं च नाक्रामति।

धान्य धनसञ्चयनं न करोति।

सर्वभूतेषु दयालुस्सन् समः क्षान्तः शुचिः निरसूयकः निस्पृहः माङ्गल्यवान् ईर्ष्याकार्पण्यवर्जी जटाश्मशृरोमनखानि धारयन् त्रिकालस्नानी धराशयो वन्यैरेव चरुपुरोडाशान् निर्वपति।

वेदवेदान्तेन ध्यानयोगी सन् तपः समाचरति।

शरीरं शोषयन् उत्तरोत्तरं तीव्रं तपः करोति।

अत्र श्रामणिकाग्निकुण्डं परिशीलयामः। श्रमणां तपसां एतन्मूलं श्रामण्कं भवेत्। अनेन विधानेन एनमग्निं संसाध्य विशेषहोमं निर्वहति।[१]

---

१. गृहस्थस्सपत्नीकः पञ्चाग्निभिस्त्रेताग्निभिर्वा गृहाद्वनाश्रमं यास्यन् आहिताग्निरनाहिताग्निश्चौपासनमरण्यामारोप्य गृहे मधित्वा श्रामणकीयविधानेनाधायाघारं हुत्वा श्रामणकाग्निमाधाय तृतीयमाश्रमं गच्छेत्। श्री.वै.ध.सू. ८-६-४३

## ४.४.३. श्रामणकाग्निकुण्डलक्षणम्

श्रामणकाग्निकुण्डं त्रिवेदिसहितं, तत्र ऊर्ध्ववेदिस्तावत् द्वात्रिंशदङ्गुलायता चतुरङ्गुलविस्तारा उन्नता च।मध्यमा वेदिः पञ्चाङ्गुलविस्तारा चतुरङ्गुल उत्सेधा च। अधोवेदिरपि चतुरङ्गुलविस्तारा उन्नता भवति। अस्मिन् अग्निकुण्डे वानप्रस्थः नित्यमौपासनहोमं हुत्वा महाव्याहृतीभिश्च अग्निं साधयति।

श्रामणकाग्निकुण्डमेतत् वानप्रस्थधर्मे विशेषतया अस्मिन् वैखानसधर्मसूत्रे[१] परिदृश्यते।

---

१. श्रामणकाग्नेश्चोर्ध्ववेदिः द्वात्रिंशदङ्गुलायता चतुरङ्गुलविस्तारोन्नता मध्यमा तत्परिगता पञ्चाङ्गुलविस्तारा चतुरङ्गुलोत्सेधाधस्तादूर्ध्ववेदिविस्तारोन्नता तृतीयावेदिर्द्वादशाङ्गुलं मद्ये निम्नं त्रिवेदिसहितं कुण्डं कृत्वाधाय वनस्थो नित्यमौपासनवत्सायंप्रातराहुतिर्हुत्वा महाव्याहृतिभिः श्रामणकाग्निं जुहुयात्। श्री.वै.ध.सू. ८-६-४८

## ४.४.४. श्रीवैखानसधर्मसूत्रोक्त श्रामणकाग्निकुण्डलक्षणम्




## ४.४.५. वानप्रस्थभेदाः



वानप्रस्थो द्विविधः सपत्नीको अपत्नीकश्चेति। सपत्नीकः तावत् चतुर्विधा भवन्ति औदुम्बर - वैरिञ्च - वालखिल्य - फेनपा इति। वैखानसधर्मसूत्रोक्तान्[१] एतान् परिशीलयामः।

### ४.४.६. औदुम्बरवानप्रस्थः

औदुम्बरवानप्रस्थः तावत् आकृष्टफलावाप्योषधिभोजी मूलफलाशी वा भवति। लवण-हिङ्गु-लशुन-मधु-मत्स्य-मांस-पूत्यन्न-आम्लधान्य- परस्पर्शन-परपाकवर्जी भवति।

अयं तावत् देवर्षिपितृमनुष्यपूजी वनचरो भवति। श्रामणकाग्नौ वैश्वदेवहोमं च कुर्वन् तपमाचरति[२]।

### ४.४.७. वैरिञ्चवानप्रस्थः

वैरिञ्चवानप्रस्थस्तावत् प्रातः काले यां दिशं पश्यति तां दिशं प्रति गत्वा प्रियङ्गु-यवधान्यानि स्वीकृत्य

---

१. वानप्रस्थास्सपत्नीकापत्नीकाश्चेति। श्री.वै.ध.सू. ८,७,४९-५०
सपत्नीकाश्चतुर्विधा औदुम्बरो वैरिञ्चो वालखिल्यः फेनपश्चेति।
अपत्नीकः बहुविधाः। कलाशिका उद्दण्ड----- इत्येते।
८-८-५८

१. औदुम्बरो आकृष्टफलावाप्योषधिभोजी मूलफलाशी वा लवणहिङ्गु लशुनमधुमत्स्य मांस पूत्यन्नधान्याम्ल परस्पर्शनपरपाकवर्जी देवर्षिपितृमनुष्यपूजी वनचरो ग्रामबहिष्कृत्यसायंप्रातरग्निहोत्रं हुत्वा श्रामणकाग्निहोमं वैश्वदेवहोमं च कुर्वन् तपस्समाचरति।
श्री.वै.ध.सू. ८-७-५१

श्रामणिकाग्नौ वैश्वदेवहोमं च कुर्वन् नारायण- परायणः तपश्शीलो भवति[१]।

### ४.४.८. वालखिल्यवानप्रस्थः

वालखिल्यवानप्रस्थस्तावत् जटाधरः चीरवल्कलवसनस्सन् तपः[२] करोति।

### ४.४.९. फेनपवानप्रस्थः

फेनपवानप्रस्थस्तावत् उद्दण्डकः उन्मत्तकः निरोधकः शीर्णपतित- पत्राहारी सन् चान्द्रयणव्रतं चरन् पृथिवीशायी नारायणं ध्यायन् मोक्षं प्रति प्रतिक्षणं प्रार्थयति[३]।

### ४.४.१०. अपत्नीकभेदाः

अपत्नीक वानप्रस्थाः बहुविधाः भवन्ति[४] । ते तावत्

---

१. वैरिञ्चः प्रातर्यां दिशं प्रेक्ष्यते तां दिशं गत्वा तत्र प्रियङ्गु यवश्यामाकनीवारादिभिर्लब्धैस्स्वकीयान् अतिथींश्च पोषयित्वाग्निहोत्रश्रामणकवैश्वदेवहोमी नारायणपरायणस्सन् तपश्शीलो भवति।
श्री.वै.ध.सू. ८,७, ५३

२. वालखिल्यो जटाधरश्चीरवल्कलवसनोऽर्काग्निः कार्तिक्यां पौर्णमास्यां पुष्कलं भक्तमुत्सृज्यान्यधा शेषान्मासानुपजीव्य तपः कुर्यात्।
श्री.वै.ध.सू. ८-७-५५

३. फेनप उद्दण्डक उन्मत्तको निरोधको शीर्णपतितपत्रहारी चान्द्रयणव्रतं चरन् पृथिवीशायी नारायणं ध्यायन् मोक्षमेव प्रार्थयते।
श्री.वै.ध.सू.८-७-५५

४. श्री.वै.ध.सू. ८, ८, ५७

| | | | |
|---|---|---|---|
| १. | कालाशिकाः | २. | उद्दण्डसंवृत्ताः |
| ३. | अश्मकुट्टाः | ४. | उदग्रफलिनः |
| ५. | दन्तोलूखलिकाः | ६. | उञ्छवृत्तिकाः |
| ७. | संदशनवृत्तिकाः | ८. | कपोतवृत्तिकाः |
| ९. | मृगचारिकाः | १०. | हस्तदायिनः |
| ११. | शैलफलखादिनः | १२. | अर्कदुग्धाशिनः |
| १३. | बैल्वाशिनः | १४. | कुसुमाशिनः |
| १५. | पाण्डुपत्राशिनः | १६. | कालान्तरभोजिनः |
| १७. | एककालिकाः | १८. | चतुष्कालिकाः |
| १९. | कण्टकशायिनः | २०. | वीरासनशायिनः |
| २१. | पञ्चाग्निमध्यशायिनः | २२. | धूमाशिनः |
| २३. | पाषाणशायिनः | २४. | अभ्यवकाशिनः |
| २५. | उदकुम्भवाशिनः | २६. | मौनिनः |
| २७. | अवाक्शिरसः | २८. | सूर्यप्रतिमुखाः |
| २९. | ऊर्ध्वबाहुकाः | ३०. | अधोमुखाः |
| ३१. | एकपादस्थिताः | | |

इति अपत्नीकवानप्रस्थाः सन्तीति वैखानसधर्मसूत्रे विशेषतया निरूप्यन्ते। एतेषां नामानां निर्वचनानि यथा[1] -

१. कालेन सीदन्तीति कालशिकाः।
काले काले सीदन्ति भोजनार्थं गच्छन्तीति वा
कालाशिकाः।

---

१. श्री. वै.स्मा. सू. नृ.भा. पृ. १०८ & १०९

२. उद्दण्डमात्मदमनमेव संवृत्तं चरित्रमेषां ते **उद्दण्डसंवृत्ताः**।

३. अश्मनि पाषाणोपरि वा नान्यत्र उलूखलादौ कुट्टयन्ति प्रियंग्वादिकं सर्वम्
अवघ्नन्तीत्यश्मकुट्टाः।
अश्मानं पाषाणविशेषं भक्षणार्थं कुट्टयन्ति छेदयन्तीतिवा **अश्मकुट्टाः**।

४. उदग्रमासन्नं फलमशनं येषां ते **उदग्रफलिनः**।
उदग्रमुन्नतं फलं मोक्षादिकं येषामिति वा **उदग्रफलिनः**।

५. दन्ता एवोलूखलं एषां ते **दन्तोलूखलिकाः**।

६. उञ्छ भूम्यां स्वयमेव पतित प्रियंग्वादि धान्याहरणं तदेव वृत्तिर्वर्तनमेषां ते **उञ्छवृत्तिकाः**।

७. सन्दशनं पदार्थानां खादनमेव वृत्तिर्जीवनमेषां ते **सन्दशनवृत्तिकाः**।

८. कपोतः पारावतस्तस्य वृत्तिरिव वृत्तिर्येषां ते **कपोतवृत्तिकाः**।

९. मृगाणां चार इव सञ्चारो येषां ते **मृगचारिकाः**।
मृगा इव चरन्ती तृणादिभक्षणं कुर्वन्तीति वा **मृगचारिकाः**।

१०. हस्तेन पाणिनैव धान्यं फलं मूलं वा अदातुमाहर्तुमाखण्डितुं वा शीलमेषां ते **हस्तादायिनः**।

११. शैले पर्वते विद्यमानानि फलान्येव खादितुं शीलं येषां ते **शैलफलखादिनः**।

१२. अर्केण सूर्यकिरणैः दग्धानि शुष्कानि पक्वानि वा पर्णादीनि अशितुं शीलं येषां ते **अर्कदुग्धाशिनः**।

१३. बिल्वस्य पर्णादीन्यशितुं शीलं येषां ते **बैल्वाशिनः**।

१४. कुसुमानि पुष्पाण्येवाशितुं शीलं येषां ते **कुसुमाशिनः**।

१५. पाण्डूनि फलितानि शिथिलवृन्तानि पत्राण्यशितुं शीलं येषां ते **पाण्डुपत्राशिनः**।

१६. कालान्तरे कदाचित् भोजनं येषां ते **कालान्तरभोजिनः**।

१७. एककालिकं नियमानुष्ठानादिकं येषां ते **एककालिकाः**।

१८. चतुष्कालिकं नियमानुष्ठानादिकं येषां ते **चतुष्कालिकाः**।

१९. कण्टकानामुपरि शयितुं शीलं येषां ते **कण्टकशायिनः**।

२०. वीरासनं वीरशयनं च येषां ते **वीरासनशायिनः**।
वीरासन एव शयितुं शीलं येषामिति वा **वीरासनशायिनः**।

२१. पञ्चाग्नीनामिति उपरि सूर्यश्चतुर्दिक्षु प्रज्वलिताग्न्यः एवं पञ्चाग्नीनां मध्ये शयितुं शीलं येषान्ते **पञ्चाग्निमध्यशायिनः**।

२२. धूम एवाशनं येषां ते **धूमाशिनः**।

२३. पाषाणामुपरि शयनं येषां ते **पाषाणशायिनः**।

२४. अभ्यवकाशिनः **जाग्रत्स्वभाविनः**।

२५. उदकुम्भे वारिपूर्णघटादौ वसितुं शीलं येषां ते **उदकुम्भवासिनः**।

२६. मौनमभाषणं येषां ते **मौनिनः**।

२७. अवाञ्चि अधः कृतानि शिरांसि येषां ते **अवाक्छिरसः**।

२८. सूर्यस्य प्रतिमुखानि सूर्याभिमुखानि वक्त्राणि येषां ते **सूर्यप्रतिमुखाः**

२९. ऊर्ध्वमुपरिष्टात् बाहूप्रसारितौ भुजौ येषां ते **ऊर्ध्वबाहुकाः**।

३०. अधोमुखानि वक्त्राणि येषां ते **अधोमुखाः**।

३१. एकेन पादेन तिष्ठन्तीति **एकपादस्थिताः**॥

इति नृसिंहवाजपेयभाष्ये दृश्यन्ते।

**४.४.११. अपत्नीकवानप्रस्थधर्माः**

अपत्नीकवानप्रस्थः विशेषहोमादिकं च परिसमाप्य पुत्रेषु भार्यां निधाय अग्निमात्मनि च आरोप्य वल्कल उपवीत भिक्षापात्रं च स्वीकृत्य अनग्निः अदारासन् वनं प्रति गत्वा निवसतीति अपत्नीकवानप्रस्थधर्माणां विवरणं उपदिश्यन्ते वैखानस- धर्मसूत्रे[१]।

---

१. अपत्नीकश्च भिक्षुवदग्नौ होमं हूत्वारण्यादिपात्राणि च प्रक्षिप्य पुत्रे भार्यां निधाय तथाग्नीनात्म-न्यारोप्य वल्कलोपवीतादीन् भिक्षापात्रं च संगृह्यानग्निरदारो गत्वा वने निवसेत्। श्री.वै.ध.सू. ९,५,३९

## ४.५. वैखानससूत्रोक्तवानप्रस्थस्य सार्वत्रिकता

श्रीवैखानसधर्मसूत्रे ये प्रतिपादिताः वैखानसवानप्रस्थधर्माः सन्ति ते सर्वेऽपि आपस्तम्ब-मनु-गौतम-बोधायनमहर्षिभिः स्वीकृताः वर्तन्ते। अतः वैखानससूत्रमिदं सर्वोत्तमत्वेन परिगणितं भवति। वानप्रस्थाश्रमधर्माणाम् एतेषां सार्वत्रिकता उद्घोष्यते इति नैव संशीतिलेशः। सार्वत्रिकता कीदृशी इति? परिशीलयामः।

**गौतमधर्मसूत्रे[१] तावत्**

**वैखानसो वने मूलफलाशी तपश्शीलः श्रावणकेनाग्निमाधाय ॥**

**गौतमधर्मसूत्रव्याख्यायाम्[२] तावत्**

**अथ वानप्रस्थधर्मा उच्यन्ते। विखनसप्रोक्तेन मार्गेण वर्तन्ते इति वैखानसः वानप्रस्थः, स वने एव वसेत् न तु ग्रामे कारणान्तरादपि ग्रामं न प्रविशेत्- फलाकृष्टां भूमिमपि नाक्रमेत् इत्यग्रे वक्ष्यति।**

**श्रावणकं नाम वैखानसं शास्त्रम्। तत्प्रोक्तेन विधिना अग्निं श्रावणकाग्निं षड्भ्यो मासेभ्य ऊर्ध्वम् आधाय तेन दर्शपूर्णमासादि कुर्यात्। श्रामणिकेनाग्निमाधायाहिताग्निः**

१. १,३,२५-२६

२. पृ. ३०-३१

स्यात्। इति वसिष्ठः। मनुश्च वैतानिकं च जुहुयादग्निहोत्रं यथाविधि।

बौधायनधर्मसूत्रे[1] तावत्

वानप्रस्थो वैखानसशास्त्रसमुदाचारः।

वैखानसो वने मूलफलाशी तपश्शीलः सवनेषूदकमुपस्पृशञ्छ्रामणकेनाग्निमाधायाग्राम्यभोजी देवपितृभूतमनुष्यऋषिपूजकः सर्वातिथिः प्रतिषिद्धवर्जं भैक्षमप्युपयुञ्जीत न फालकृष्टमधितिष्ठेत्। ग्रामं च न प्रविशेत्। जटिलश्चीराजिनवासा नातिसंवत्सरं भुञ्जीत।

बौधायनधर्मसूत्रव्याख्यायाम्[2]

वने प्रतिष्ठित इति वानप्रस्थः। वैखानसोऽपि वानप्रस्थ एव। संज्ञान्तरकरणं तु संव्यवहारार्थम्। विखनसा ऋषिणा प्रोक्तं वैखानसशास्त्रम्। तत्र हि बहवो धर्मा वानप्रस्थस्योक्ताः "ग्रीष्मे पञ्चतपाः" इत्यादयः। समुदाचारः समाप्ताचार इत्यर्थः। वने मूलफलान्यश्नन् प्रतिषिद्धानि परिहरेत्। तपश्शीलः तपः परः। सवनेषूदकोपस्पर्शनं त्रिषवण-स्नानम्। श्रामणो नामाधानविधिरस्तिवैखानसशास्त्रे।

---

१. २,६,११,१६-१७

२. पृ. २५०-२५१

आपस्तम्बधर्मसूत्रे[1]

तस्योपदिशन्त्येकाग्निरनिकेतस्स्यादशर्माऽशरणो मुनिः स्वाध्याय एवोत्सृजमानो वाचम्।

आपस्तम्बधर्मसूत्र हरदत्तमिश्रविरचितायामुज्ज्वलव्याख्यायाम्[2]

श्रामणकेनाग्निमाधायेति गौतमः। अस्यार्थः- श्रामणकं नाम वैखानससूत्रम्। तदुक्तेन प्रकारेण एको अग्निराधेयः तस्मिन् सायंप्रातरग्निकार्यमिति। तथा च बौधायनः वानप्रस्थो वैखानसशास्त्रसमुदाचारो, वैखनसो वने मूलफलाशी तपश्शीलस्सवनेषूदकमुपस्पृशन् श्रामणकेनाग्नि-मुपसामाधायेत्यादि।

मनुस्मृत्याम्[3]

पुष्पमूलफलैर्वापि केवलैर्वतयेत्सदा।<br>
कालपक्वैः स्वयं शीर्णैर्वैखानसमतेस्थितः॥

मनुस्मृत्याः कुल्लूकभट्टव्याख्यायाम्[4]

पुष्पमूलफलैरेव वा कालपक्वैः स्वयं पतितैर्जीवेत्। वैखानसो वानप्रस्थः तद्धर्मप्रतिपादकशास्त्रदर्शने स्थितः तेनैतदुक्तं। अन्यदपि वैखानसशास्त्रोक्तं धर्ममनुतिष्ठेत्।

---

१. २, ९, २०

२. पृ. ३४२

३. ५, २१

४. पृ. २७७-२७८

इति विव्रियन्ते गौतम - बोधायन - आपस्तम्ब मनुस्मृतिग्रन्थेषु तेषां व्याख्यासु च। वैखानससूत्रोक्तवानप्रस्थधर्माणां सार्वत्रिकता सर्वत्र एवं प्रदर्श्यन्ते।

अतः वैखानसवानप्रस्थधर्माः सर्वैः सङ्ग्राह्याः भवन्तीति सुष्ठु अवगम्यते।

**४.६.१. भिक्षुकः**

वानप्रस्थः सप्ततिवयस्कस्सन् वृद्धः जन्ममृत्युजरादीन् विचिन्त्य योगार्थी यदा स्यात् तदा सपत्नीकश्चेत् पुत्रे भार्यां निक्षिप्य परमात्मनि बुद्धिं निवेश्य सन्याशाश्रमं प्राप्नोति।

**भिक्षते अन्नं याचतीति भिक्षुः।**

अयं आध्यात्मरतः भिक्षाशीसन् नियमांश्च समाचरन् संयतेन्द्रियस्सन् ध्यानयोगेन परमात्मनं पश्यति [१]।

**४.६.२. भिक्षुकधर्माः**

भिक्षुकः तावत् स्नात्वा नित्यं प्रणवेन आत्मानं तर्पयति। स च तावत् काषायवस्त्रधारणं, सर्वत्यागं समाचरति। असहायस्सन् अनग्निः निस्सङ्गयो भूत्वा सम्मानावमानयोः समः, विवाद - क्रोध - लोभ - मोह - अनृतवर्जी विविक्ते मठे देवालये वृक्षमूले वा निवसति। अयं त्रिदण्डधारीसन् काषाय अप्पवित्रादीन् स्वीकृत्य

---

१. सत्पत्यूर्ध्वं वृद्धो अनपत्यो विधुरो वा जन्ममृत्युजरादीन्विचिन्त्य योगर्थी यदास्यात्तदा अथवा पुत्रे भार्यां निक्षिप्य परमात्मनि बुद्धिं निवेश्य वनात्सन्यासं कुर्यात्। श्री.वै.ध.सू. ९,६,४२

कण्ठे वामहस्तेन धारयन् दक्षिणहस्तेन भिक्षापात्रं स्वीकृत्य विप्राणां शुद्धानां गृहेषु भिक्षान्नं याचयति। अयं तावत् अधोमुखस्तिष्ठन् भिक्षामलिप्सेत। भिक्षालाभे अवमानेऽपि विषादं न प्राप्नोति। लभ्ये सम्मानेऽपि सन्तोषी न भवति। आत्मयज्ञं संकल्प्य प्राणयात्रामात्रं प्राश्नाति। बन्धून् ज्ञातिं त्यजति। वंशचारित्रं तपःशृतं च न वदति।

अयं तावत् सङ्गं त्यक्त्वा नियमयमीसन् प्रियं सत्यं च वदन् सर्वभूतस्य अविरोधी भूत्वा समः सदा आध्यात्मरतः सदा ध्यानयोगेन नारायणं परंब्रह्मं पश्यन् धारणां धारयति।

अयं च भिक्षुकः येभिः धर्मैः अक्षरं परं ब्रह्मपरमात्मानं श्रीमन्नारायणं प्राप्नोति। एते भिक्षुकधर्माः वैखानसधर्मसूत्रे[१] विशेषतया विलक्षणतया च परिदृश्यन्ते।

---

१. भिक्षुस्स्नात्वा नित्यं प्रणवेनात्मानं तर्पयेत्।
तेनैव तं नमस्कुर्यात् ।
षडवरान्प्राणायामान् कृत्वा शतावरां सावित्रीं जप्त्वा सन्ध्यामुपासीत।
अप्पवित्रेणोत्पूताभिरद्भिराचामेत्।
काषायधारणं सर्वत्यागं मैथुनवर्जनमस्तैन्यादीनप्याचरेत्।
असहायो अनग्निरनिकेतनो निस्संचयो सम्मानावमानसमो विवादक्रोधलोभमोहानृतवर्जी ग्रामाब्दहिः विविक्ते मठे देवालये वृक्षमूले वा निवसेत्।
चातुर्मास्यादन्यत्रैकाहादूर्ध्वमेकस्मिन्देशे न वसेत्।
वर्षाशरच्च्यातुर्मास्यमेकत्रैव वसेत्।
त्रिदण्डे काषायाप्पवित्रादीन्योजयित्वा कण्ठे वामहस्तेन धारयन्दक्षिणेन भिक्षापात्रं गृहीत्वैककाले विप्राणां शुद्धानां गृहेषु वैश्वदेवान्ते भिक्षां चरेत्। श्री.वै.ध.सू. १०,८,८०-८८

## ४.६.३. भिक्षुकभेदाः




वैखानसधर्मसूत्रे भिक्षुकाः तावत् कर्मानुरोधेन चतुर्विधाः भवन्ति ते तावत् कुटीचक- बहूदक - हंसा - परमहंसा इति। एतान् परिशीलयामः

## ४.६.४. कुटीचकभिक्षुकः

कुटीचकभिक्षुकः गौतमानाम् आश्रमेषु चरन्तस्सन् योगमार्गतत्त्वज्ञाः भवन्ति। कुट्यां स्वगृहसीमन्येव चरन्तीति कुटीचकाः।

## ४.६.५. बहूदकभिक्षुकः

बहूदकभिक्षुकस्तावत् त्रिदण्ड - कमण्डलु - काषाय- धातुवस्त्र- वेषधारिणो भूत्वा ब्रह्मर्षिगृहेषु भिक्षान्नं प्राप्य मोक्षं प्रति प्रार्थयति। स्नानाद्यर्थं बहूनि उदकानि येषां ते बहूदकाः।

## ४.६.६. हंसभिक्षुकः

हंसभिक्षुकास्तावत् ग्रामे च एकरात्रं नगरे पञ्चरात्रं वसन् गोमूत्र गोमयाहारिणस्सन् नित्यचान्द्रायणव्रतिनो भूत्वा मोक्षं प्रति अभिलषन्ति। निघ्नन्ति पापानि हिंसन्तीति हंसाः।

### ४.६.७. परमहंसभिक्षुकः

परमहंसभिक्षुकास्तावत् वृक्षमूले शून्यागारे श्मशाने वा वसन्तस्सन् साम्बरा दिगम्बरा वा भवन्ति। एते धार्माधर्म-सत्यानृत-शुध्याशुध्यविषये समानत्वं प्राप्नुवन्ति। सर्वसमाः- सर्वात्मनः- समलोष्ठकाञ्चनाः - सर्ववर्णेषु भिक्षान्नं प्राप्तुम् इच्छुकाः एते भवन्ति।

परममुत्कृष्टं पदं हंसन्ति गच्छन्तीति परमहंसाः। परमात्मानं ब्रह्माणं हंसन्ति तपसा आधिक्याद्गच्छन्तीति वा परमहंसाः इति।

एते भिक्षुकभेदाः वैखानसधर्मसूत्रे[१] सुस्पष्टं प्रोच्यन्ते।

### ४.७. आश्रमधर्मानुष्ठानफलम्

वैखानसधर्मसूत्रोक्त आश्रमधर्मानुष्ठानेन विशिष्ठं फलं साधयतीति[२] तेन परमात्मनः परंज्योतिप्रवेशनं च सम्भवतीति च ज्ञायते। तद्यथा-

---

१. अथ भिक्षुका मोक्षर्थिनः कुटीचका बहूदका हंसाः परमहंसाश्चेति चतुर्विधा भवन्ति।

श्री.वै.ध.सू. ८,९,५९

२. ब्राह्मणानां चातुराश्रम्यं क्षत्रियाणां त्र्याश्रम्यं वैश्यानां द्व्याश्राम्यं विहितम्। तत्फलं हि सकामं निष्कामं चेति द्विविधं भवति।

श्री.वै.ध.सू. ८,९,६६-६७




तत्र सकामं नाम इहसंसारे अभिवृद्धिं पश्यन् स्वर्गादि फलकांक्षणेन धन्यः [१]भवति।

निष्कामस्तावत् यथा विहितानुष्ठानेन फलं साधयति[२]। एतत् निष्कामं द्विविधं भवति प्रवृत्तिः निवृत्तिः चेति[३]।

प्रवृत्तिर्निष्कामं तावत् योगमार्गेन वायुजयं कृत्वा अणिमादि ऐश्वर्यसिद्धिं साधयति[४]।

---

१. सकामं नामेहसंसारे अभिवृद्धिं ज्ञात्वा पुत्रलाभाध्यभिकांक्षणमन्यत् स्वर्गादि फलकांक्षणं वा। श्री.वै.ध.सू. ८-९-६८

२. निष्कामं नाम किञ्चिदनभिकांक्ष्य यथाविहितानुष्ठानमिति। श्री.वै.ध.सू. ८-९-६९

३. तत्र निष्कामं द्विविधं भवति प्रवृत्तिर्निवृत्तिश्चेति। श्री.वै.ध.सू. ८-९-७०

४. प्रवृत्तिर्नाम संसारमनादृत्य सांख्याज्ञानं समाश्रित्य प्राणायामासनप्रत्याहार धारणायुक्तो वायुजयं कृत्वा अणिमाद्यैश्वर्यप्रापणम्। श्री.वै.ध.सू. ८-९-७१

निवृत्तिर्निष्कामं तावत् संसारं परित्यज्य परमात्मनः अन्यं न किंचिदस्तीति ज्ञात्वा अतीन्द्रियं सर्वजगद्बीजं नित्यानन्दम् अमृतरसपानवत् सर्वदा तृप्तिकरं परंज्योतिः प्रवेशनं भवति[१]।

निवृत्तिर्निष्कामभेदमनुसृत्य योगिनः त्रिविधाः भवन्ति[२]। ते सारङ्ग- एकार्ष्य-विसरगा इति। तत्र सारङ्गास्तावत् अनिरोधका - निरोधका- मार्गगा-विमार्गगा इति चतुर्विधा भवन्ति।

एकार्ष्यास्तावत् दूरगा अदूरगा भ्रूमध्यगा असम्भक्ता सम्भक्ता इति पञ्चधा भवन्ति।

तत्र विसरगाः बहुविधाः।

**४.८. अनिरोधकः** अहंविष्णुरिति भावयति।

**४.९. निरोधकः** प्राणायामादियोगजयः।

**४.१०. मार्गगः** प्राणायामे अनुतिष्ठति।

**४.११. विमार्गगः** अष्टाङ्गयोगैः विशेषरूपेण सञ्चरति।

**४.१२. दूरगः** योगमार्गेण वैकुण्ठसायुज्यं प्रयाति।

---

१. निवृत्तिर्नाम लोकानामनित्यत्वं ज्ञात्वा परमात्मनोऽन्यन्नकिञ्चिदस्तीति संसारमनादृत्यच्छित्वा भार्यामयंपाशं जितेन्द्रियो भूत्वा शरीरं विहाय क्षेत्रज्ञ परमात्मनोर्योगं कृत्वातीन्द्रियं सर्वजगब्दीजमशेषविशेषं नित्यानन्दममृतरसपानवत् सर्वदा तृप्तिकरं परंज्योतिः प्रवेशनमिति विज्ञायते। श्री.वै.ध.सू. ८-१०-७३

२. निवृत्याचारभेदाद्धि योगिनस्त्रिविधा भवन्ति सारङ्गा एकार्ष्या विसरगाश्चेति। श्री.वै.ध.सू. ८-१०-७४

४.१३. अदूरगः आकाशवत् सत्तामात्रः।

४.१४. भ्रूमध्यगः योगान्तम् आकर्षण निष्क्रमणक्रियानिर्वहणं करोति।

४.१५. असम्भक्तः मनसा श्रोत्रेण चक्षुषा घ्राणेन पाणिना च देवता सेवां करोति ।

४.१६. सम्भक्तः ब्रह्मव्यतिरिक्तम् अन्यं नास्तीति सञ्चरति।

४.१७. विसरगः अहङ्कारसंयुक्तः।

योगिभेदेषु एतेषु विसरगपक्षः मोक्षकांक्षी नानुष्ठेयः भवति। अयं मार्गः सदा परित्याज्यः इति वैखानसधर्मसूत्रे[१] स्पष्टमुपदिश्यते।

**४.१८. वर्णाश्रमाणां मोक्षोपायः**

सर्वेषां ब्रह्मचारि-गृहस्थ-वानप्रस्थ-संन्यासिनां भेदोपभेदानां च मोक्षोपायः वैखानसधर्मसूत्रे[२] विशेषतया विलक्षणतया सुष्ठु उपदिश्यते।

**सगुणे ब्रह्मणि बुद्धिं निवेश्य पश्चान्निर्गुणं**

---

१. विविधसरणाद्विविधदर्शनात्कुपथगामित्वाद्विसरगाः ।
पुरा प्रजापतिरुपदेशगूहनार्थं विसरगपक्षं सृष्टवान् ।
तं दृष्ट्वा मुनयोपि मोहं जग्मुः।
किं पुनर्मनुष्याः।
विसरकपशूनामहङ्कारयुक्तानां जन्मन्तरेषु मुक्तिर्नास्मिन्जन्मनि।
तस्माद्विसरकपक्षो नानुष्ठेयः । श्री.वै.ध.सू. ८-११-१०५

२. श्री.वै.ध.सू. ८-११-११३.

ब्रह्माश्रित्य मोक्षे नित्यं यत्नं कुर्यादिति विज्ञायते। अस्य सूत्रस्य [१]भाष्यम् अधोनिर्दिष्टप्रकारेण प्रोच्यते।

योगी प्रथमं प्रतिमासु शङ्खचक्रगदाधरं किरीटकेयूरहारादिभूषान्वितं कौस्तुभोद्भासितोरस्कं श्रीवत्साङ्कं पूर्णचन्द्रनिभाननं पद्मपत्रनिभेक्षणं पद्मोदरं बिम्बनिभोष्ठं शुचिस्मितं शुद्धस्फटिकसङ्काशं पद्मच्छविपाणिपादतलं पीतवाससमच्युतमनामयमनुपमेयं वासुदेवं जगन्नाथं नारायणं परमात्मानमीश्वरं प्रभामयं पुरुषोत्तमं सर्वगतं देवेशं नित्यमभ्यर्च्य तं चक्षुषावलोकयेत्।

एवं किञ्चित्कालं चक्षुर्गोचरं कृत्वा पश्चात् पूर्वोक्ताधारेषु एकस्मिन्नाधारे हृदयकमले वा पूर्वोक्तेन पञ्चविधेन सगुणध्यानेन सगुणं नारायणमन्तर्यामिनं मनसाभ्यर्च्य तद्रूपं भावयेत्।

एवं सगुणे ब्रह्मणि बुद्धिं निवेश्य पश्चान्निर्गुणं ब्रह्माश्रित्येति, एवं मनोगोचरं तद्रूपमेव पश्चात् हृदयकमले ज्योतिर्मयं शुद्धं सर्वगतमाकाशवद्दृढमत्यच्छममलं नित्यमादिमध्यान्तरहितं मूलं सूक्ष्ममनाकारमस्पृश्यमचक्षुषम् ओंकारगम्यं गुणातीतमप्रमेयमनुत्तमानन्दमयमजरमन्तर्बहिष्ठं सर्वतोमुखं सर्वधृक् सर्वतः पादमव्यक्तं शरीरनाशान्तं क्षेत्रज्ञयोगान्तं पश्चान्निर्गुणं ब्रह्माश्रित्यान्ते बाह्यवायुमिडयोदरमाकृष्य पूर्ववन्निरुध्य तयोन्मीलनया सुषुम्नया जीवात्मानमुद्गमयित्वा अधोमुखात् शिरः पादान्निर्गताभिः सहस्राभिरमृतधाराभिः समन्ततः परिप्लावितः सम्पूर्णसाङ्गोपाङ्गकलेबरस्सन् तं दृष्ट्वा अहमेव परमानन्दस्वरूपी परंब्रह्माव्यय इति

१. श्री.वै.स्मा.सू.नृ.भा. पृ. १४९

यो ध्यायेत्सजीवन्नेवमुक्तः। स च अस्मिन्नेव जन्मनि मोक्षं प्राप्नोति।

## ४.१९.सदाचाराः

सदाचारः एव धर्मः। स च तावत् अनुष्ठानरूपेण विद्यते इति विशेषतया सदाचारविधयः वैखानसधर्मसूत्रे ब्रह्मचारिणां गृहस्थानां च कृते उपदिश्यन्ते[१]। ते तावत्

मूत्रपुरीषविसर्जनविधिः, शौचविधिः, वानप्रस्थभिक्ष्वोः शौचविधिः, रेतोविसर्गे शौचविधिः, प्राणायामलक्षणं, सावित्रीजपसंख्या अभिवादनप्रकारः, आशीर्वादः, प्रत्यहमभिवादनीयाः प्रोष्यागत्याभिवन्द्याः, मातृवत्पूजनीयाः, परस्त्रीवन्दनप्रकारः, वन्दनीयफलम्, अनध्यायाः, वेदाध्ययनं , भिक्षान्नभोजनं, पारक्ये स्नानविधिः, कूपस्नानविधिः, आतुरस्नानविधिः, भोजनविधिः, उच्छिष्टाद्याः, रात्रावभोजनम्, अभोज्यम् इत्येते अंशाः स्पष्टं उपदिशन्ति वैखानसधर्मसूत्रे।

### ४.१९.१.सामान्यधर्माः

वैखानसधर्मसूत्रे सर्वेषां कृते सामान्यधर्माः विशेषतया विलक्षणतया च स्पष्टमुपदिश्यन्ते। एते सर्वेऽपि सूत्ररूपेण विद्यन्ते, एतान्यत्र परिशोधकानां सौलभ्याय प्रदर्शयामि[१]।

**द्विजातिः पतितान्त्यजातान्नस्पृशेत्।**

**उदयेऽस्तमये च सूर्यं नेक्षेत।**

---

१. श्री. वै. ध. सू. ९ प्रश्ने ५ प्रभृति १२२ सूत्राणि

देवगुरुविप्रघृतक्षीरदधिमृत्तोयसमिद्दर्भाग्निवनस्पतीन् प्रदक्षिणं गच्छेत्।

स्नातकराजगुरुश्रेष्ठरोगिभारभृदन्तर्वत्नीनां पन्थादेयः।

वातार्करश्मिभिः पन्थाः न शुध्यन्ति।

परस्यासनशयनान्यदत्तानि नोपयुञ्जीत।

अदत्तेषूपयुक्तेषु स्वपुण्यचतुर्थांशो जहाति।

अन्योपयुक्तानि वस्त्रमाल्योपानच्छत्राणि नैव धारयेत्।

अग्नौ पादं न तापयेत्।

नैनं मुखेन धमेत्।

न पादेन स्पृशेत्।

अधः पादतो न कुर्यात्।

अग्नावग्निं जलं वा देवालयेऽग्नौ जले च मूत्रपुरीषपूयशोणितरेतश्लेष्मोच्छिष्टाङ्गनिष्पेषान्नप्रक्षिपेत्।

नग्नां परस्त्रियं विण्मूत्रे च न पश्येत्।

उच्छिष्टो देवार्कचन्द्रग्रहार्क्षताराान्नेक्षेत।

देवगुरुस्नातकदीक्षितराजगोश्रेष्ठानां छायां नाक्रामति

इन्द्रधनुः परस्मै न दर्शयेत्।

न वदेत्।

स्वपन्तं नावबोधयति।

एकोऽध्वानं न गच्छेत्।

---

१. श्री वै.ध.सू. १० प्रश्ने १५ प्रभृति ६५ सूत्राणि

परक्षेत्रे चरन्तीं गां धयन्तं वत्सं च न वारयेत्।

नैवाचक्षीत।

जीर्णमलवासा न स्यात्।

अक्षैः क्रीडां प्रेतधूमं बालातपं च वर्जयेत्।

केशरोमतुषाङ्गारकपालास्थिविण्मूत्र पूयशोणितरेत-श्लेष्मोच्छिष्टान्नाधितिष्ठेत्।

अमेद्ध्यलिप्तेऽङ्गे यावत्तल्लेप गन्ध मनश्शङ्कानस्यात्ता-वन्मृत्तोयैश्शोधयेत्।

पतिताऽन्त्यजमूर्खाधार्मिकवैरिभिस्सार्धं न वसेत्।

उच्छिष्टोऽशुचिर्वा देवगोविप्राग्नीन्नस्पृशेत्।

देवान्वेदान्राजगुरुमातापितॄन्विद्वद्ब्राह्मणान्नावमन्येत।

न निन्देत्।

अवमन्ता निन्दकश्च विनश्यति।

सर्वभूतकुत्सां ताडनं च न कुर्वीत।

गुरूणा मातापितृभ्यां तत्पित्राद्यैः भ्रातृ पितृभातृ मातुलाचार्यर्त्विगाद्यैर्विवादं नाचरेत्।

सर्वशुद्धिषु पुरुषस्यार्थशुद्धिः स्त्रीशुद्धिरन्नशुद्धिश्च श्रेष्ठतमा स्यात्।

द्रव्येषु रत्नसौवर्णरजताश्ममयान्यद्भिश्शेधयति।

अग्नौवा स्पर्शयेत्।

ताम्र त्रपु सीसायसध्यान्याम्लवारिभिर्दारुदन्तजातानि तक्षणाद्धावनाद्वा यज्ञ- पात्राणि दक्षिणपाणिना मार्जनात् क्षालनाद्वा संशोध्यानि।

चर्ममयानि संहतानि वस्त्राणि शाकमूलफलानि च प्रोक्षयेत्।

अल्पानि क्षालयेत्।

घृतादीनि द्रव्याण्युत्पूयोल्कया दर्शयेत्।

कौशेयाविकानि अरुष्करैरंशुपट्टानि श्रीफलैः शङ्खशुक्तिगोशृङ्गाणि सर्षपैस्सवारिभिर्मृण्मयानि पुनर्दाहेन गृहं मार्जनोपलेपनाप्सेकैर्भूमिं खननान्यमृत्पूरण गोवासका- द्यैर्मार्जनाद्यैश्च शोधयेत्।

गोतृप्तिकरं भूगतं तोयं दोषविहीनं नृपूतम्।

वाक्छस्तं वारिनिर्णिक्तमदृष्टम्।

योषिदास्यं कारुहस्तः प्रसारितपण्यश्च सर्वदा शुद्धम्।

शकुन्युच्छिष्टं फलमनिन्द्यम्।

मशकमक्षिकादिलीनं तद्विप्रुषश्च न दूष्याणि।

वाय्वग्निसूर्यरश्मिभिस्पृष्टं मेध्यम्।

आतुरे बाले पचनालये च शौचं न विचारणीयम्।

यथाशक्तिस्स्यात्।

विण्मूत्राभ्यां बह्वपो न दूष्याः।

परस्याचामतस्तोयबिन्दुभिर्भूमौ निपत्योद्गतैर्पादस्पृष्टै- राचामयन्नाशुस्स्यात्। इति।

| | | | |
|---|---|---|---|
| होमः | जयमन्त्राः | | |
| | चित्तं च | यजुस्संहिता ३-४-४ | ९-२-१३ |
| | चित्तिश्च | | |
| | आकूतं च | | |
| | अभ्यातानमन्त्राः | | |
| | अग्निर्भूतानामधिपति-स्समाऽवववतु | यजुस्संहिता ३-४-५ | ९-२-१३ |
| | इन्द्रोज्येष्ठनां | यजुस्संहिता ३-४-५ | ९-२-१३ |
| | राष्ट्रभृत्मन्त्राः | | |
| | "ऋताषाडृतधामाऽग्नि" | यजुस्संहिता ३-४-७ | ९-२-१३ |
| | "संहितो विश्वसामासूर्यो" | यजुस्संहिता ३-४-७ | ९-२-३३ |
| आचमनम् | "योगे योगे" | यजुस्संहिता ४-१-२ | ९-२-१४ |
| प्रणामः | "शतमिन्नुशरद" | एकाग्निकाण्डम् २-४-४ | ९-२-१४ |
| आदित्यप्रदक्षिणं | "आगन्त्रासमगन्महि" | एकाग्निकाण्डम् २-३-३ | ९-२-१४ |
| कूर्चग्रहणम् | "राष्ट्रभृदसि" | एकाग्निकाण्डम् २-९-९ | ९-२-१५ |
| जपः | "ओं भू स्तत्सवितुः" | नारायणम् ४-२७-४२ | ९-२-१६ |
| | "ओं भुवो भर्गो देवस्य" | नारायणम् | ९-२-१६ |

| | | | |
|---|---|---|---|
| | "ओं सुवर्धियोयोन" | नारायणम् | १-२-१६ |
| | "ओं भूर्भुवस्तत्सवितुः" | नारायणम् | १-२-१६ |
| | "ओं सुवर्धियोयोन" | नारायणम् | १-२-१६ |
| | "ओं भूर्भुवस्सुवस्त-त्सवितुः" | नारायणम् | १-२-१६ |
| | प्राजापत्यमन्त्राः | | |
| | "प्रजापतेनत्वत्" | सूत्रमन्त्राः | १-३-१८ |
| | "प्रजापतिर्जयान्" | यजुस्संहिता ३-४-४ | |
| | धातादिमन्त्राः | | १-३-८ |
| | "धातादतातुनोरयिम्" | यजुस्संहिता ३-३-११ | |
| | मिन्दाहुतिमन्त्राः | | १-३-१८ |
| | "यन्मआत्मनः" | यजुस्संहिता ३-२-५ | |
| | पुनरग्निश्चक्षुः | यजुस्संहिता ३-२-५ | |
| | "विच्छिन्नमन्त्राः" | | १-३-१८ |
| | "आश्रावितम्" | ब्राह्मणम् ३-७-११ | १-३-१८ |
| | "यदकर्म" | सूत्रमन्त्राः-श्रौते | १-३-१८ |
| | "यत्प्रमत्त" | सूत्रमन्त्राः | १-३-१८ |
| | वैश्वदेवमन्त्राः | | १-३-१८ |
| | "विश्वेदेवस्य" | यजुस्संहिता ४-१-९ | १-३-१८ |

| | | | |
|---|---|---|---|
| | “विश्वेअद्य” | यजुस्संहिता ४-७-१२ | ९-३-१८ |
| | वैष्णवमन्त्राः | | ९-३-१८ |
| | “अतोदेवा” | ऋग्वेदः १-२-७ | ९-३-१८ |
| | “इदंविष्णु” | यजुस्संहिता १-२-१३ | ९-३-१८ |
| | त्रीणिपदा | ब्राह्मणम् २-४-६ | ९-३-१८ |
| | ब्राह्ममन्त्राः | | ९-३-१८ |
| | “ब्रह्मजज्ञानम्” | ब्राह्मणम् २-८-८ | ९-३-१८ |
| | “हिरण्यगर्भः” | यजुस्संहिता ४-१-८ | ९-३-१८ |
| | विष्णोर्नुकम् | यजुस्संहिता २-१-१३ | ९-३-१८ |
| | प्राजपत्यमन्त्राः | | ९-३-१८ |
| | “प्रजापतेनत्व” | सूत्रमन्त्राः | ९-३-१८ |
| | “तत्वायामि” | यजुस्संहिता २-१-११ | ९-३-१८ |
| | “त्वंनो अग्ने” | यजुस्संहिता २-५-१२ | ९-३-१८ |
| द्विदण्डग्रहणम् | “देवस्यत्वा” | एकाग्निकाण्डम् २-३-३ आरण्यकम् ३-१०-६ | ९-३-१९ |
| | “योमे दण्ड” | सूत्रमन्त्राः | ९-३-१९ |

| | | | |
|---|---|---|---|
| कमण्डलुस्वीकरणम् | "येनदेवा" | यजुस्संहिता ५-७-२ | ९-३-२० |
| होमः | प्राजपत्यमन्त्राः | | ९-३-२१ |
| | प्रजापतेनत्व | सूत्रमन्त्राः | ९-३-२१ |
| | तत्वायामि | यजुस्संहिता २-१-११ | ९-३-२१ |
| | त्वंनो अग्ने | यजुस्संहिता २-५-१२ | ९-३-२१ |
| | विष्णुसूक्तमन्त्राः | | ९-३-२१ |
| | अग्नये स्वाहा | | ९-३-२१ |
| | सोमाय स्वाहा | यजुस्संहिता १-८-१३ | ९-३-२१ |
| | विष्णवे स्वाहा | ब्राह्मणम् ३-८-११ | ९-३-२१ |
| | | सौरमन्त्राः अष्टासीति। | |
| पचनम् | "तिरोधाभूः" | आरण्यकम् १-३१-१२५ | ९-४-२८ |
| सन्यासाश्रमधर्माः | | | |
| सन्यासाश्रमस्वीकारे होमः | पूर्णाहुतिमन्त्राः | | ९-६-४४ |
| | "सप्तते अग्ने" | यजुस्संहिता १-५-३ | ९-६-४४ |
| | "ऋतधान" | सूत्रमन्त्राः | ९-६-४४ |
| | पुरुषसूक्तमन्त्राः | | ९-६-४४ |
| | "सहस्रशीर्षा पुरुषः" | आरण्यकम् ३-२-३२ | |

| | | | |
|---|---|---|---|
| | अग्नये स्वाहा | | १-६-४४ |
| | ध्रुवाय स्वाहा | | १-६-४४ |
| | ध्रुवकरणाय स्वाहा | | १-६-४४ |
| | परमात्मने स्वाहा | | १-६-४४ |
| | नारायणाय स्वाहा | सूत्रमन्त्राः (नारायणबलौ) | १-६-४४ |
| | "याते अग्नेयज्ञिया" | ब्राह्मणम् २-५-८ | १-७-४९ |
| | "भवतं नस्समनसौ" | यजुस्संहिता १-३-७ | १-७-४९ |
| | "भूर्भुवस्सुवस्सन्यस्तं मया" | सूत्रमन्त्राः | १-७-५० |
| | "देवस्यत्वा" | आरण्कम् ३-१०-६ | १-८-५२ |
| | योमेदण्डः | सूत्रमन्त्राः | १-८-५२ |
| | सखामेगोपाय | गूढारुणिकोपनिषद् | १-८-५२ |
| शिख्यसंग्रहणम् | "यदस्यपारेरजसा" | यजुस्संहिता ४-२-५ | १-८-५२ |
| | "येनदेवाः पवित्रेण" | ब्राह्मणम् १-४-८ | १-८-५२ |
| कमण्डलुग्रहणम् | "येनदेवाज्योंतिषा" | यजुस्संहिता | १-८-५२ |
| मृत्पात्रग्रहणम् च | | ५-७-२ | १-८-५२ |
| अघमर्षणम् | अघमर्षणसूक्तमन्त्राः | | १-८-५३ |
| | "ऋतं च सत्यं च" | नारायणम् ४-१-७ | |
| देवेभ्यः तर्पणम् | "तर्पयामी" | | १-८-५५ |
| पितृभ्यः तर्पणम् | "स्वधा" | | १-८-५५ |

| | | | |
|---|---|---|---|
| आदित्योपस्थानम् | "उद्वयंतमसः" | यजुस्संहिता ४-१-८ | ९-८-५६ |
| सन्यासधर्माः | | | |
| आदित्याय भिक्षादानम् | "उदुत्यम्" | यजुस्संहिता १-४-४३ | १०-७-९६ |
| विष्णवे भिक्षा प्रदानम् | "अतोदेवा" | ऋग्वेदः १-२-७ | १०-७-९६ |
| ब्रह्मणे भिक्षा प्रदानम् | "ब्रह्मजज्ञानम्" | ब्राह्मणम् २-८-८ | १०-७-९६ |
| सर्वभूतेभ्यः बलिप्रदानम् | "सर्वभूतेभ्य" | | १०-७-९६ |
| अनाहिताग्नेः मरणे अवटे त्रिदण्डस्थापनम् | "यदस्यपारेरजस" | यजुस्संहिता ४-२-५ | १०-८-१०६ |
| अनाहिताग्नेः मरणेअवटे शिक्यम् अप्पवित्रं च स्थापनम् | सावित्रीमन्त्राः | नारायणम् | १०-८-१०६ |
| अनाहिताग्नेः मरणे अवटे काषाय मृद्ग्रहणी कमण्डल्वादीनां समर्पणम् | "भूमिर्भूम्न" | एकाग्निकाण्डम् २-१५-१५ | १०-८-१०६ |
| आहिताग्नेः मरणेकर्त्तव्यम् | | | |
| अग्निप्रार्थनम् | "उपावरोह" | ब्राह्मणम् २-५-८ | १०-८-१०८ |
| घृतक्षीरसमर्पणम् | "पवित्रं ते" | आरण्यकम् १-११-४८ | १०-८-१०८ |
| नरायणबलिः | पुरुषसूक्तमन्त्राः | | |
| विष्णोःविशेषार्चनम् | "सहस्रशीर्षा पुरुषः" | आरण्यकम् ३-२-३२ | १०-९-११७ |

| | | | |
|---|---|---|---|
| नारायणबलै श्रीमन्नारा- -यणस्य अर्चनम् | "नारायणाय विद्महे" | नारायणम् | १०-९-११७ |
| | अष्टाक्षरीमन्त्रः | सूत्रमन्त्रः | १०-९-११७ |
| देवतर्पणम् | केशवादिद्वादशनामन्त्राः | | १०-१०-११८ |
| होमः | सहस्रशीर्षा | आरण्यकम् ३-२-३२ | १०-१०-११९ |
| होमः | विष्णोर्नुकम् | यजुस्संहिता ११-२-१३ | १०-१०-११९ |
| नारायणबलौ बलिः होमश्च | नारायणाय नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | सहस्रशीर्षाय नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | सहस्राक्षाय नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | सहस्रपादाय नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | परमपुरुषाय नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | परमात्मने नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | परंज्योतिषे नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | परब्रह्मणे नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | अव्यक्ताय नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | सर्वकारणाय नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | यज्ञेश्वराय नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | यज्ञात्मने नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | वेश्वेभ्यो देवेभ्यो नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | सर्वेभ्यो देवताभ्यो नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| | साध्येभ्यः नमः | सूत्रमन्त्राः | १०-१०-१२१ |
| सामान्यधर्माः | | | |
| निमज्जनम् | "आपःपुनातु" वैष्णवमन्त्राः | सूत्रमन्त्राः | ९-१३-९७ |

| | | | |
|---|---|---|---|
| प्रणामः | "अतोदेवा" | ऋग्वेदः १-२-७ | ९-१३-९८ |
| | "इदं विष्णु" | यजुस्संहिता १-२-१३ | ९-१३-९८ |
| प्रणामः | "हिरण्यशृङ्गम्" | नारायणम् ४-१-७ | ९-१३-९८ |
| स्नानम् | "इदमापश्शिवा" | सूत्रमन्त्राः | ९-१३-९८ |
| भोजनविधिः | | | |
| परिषेचनम् | "ऋतंत्वासत्येन परिषिञ्चामि" | ब्राह्मणम् २-१-११ | ९-१४-१४ |
| | "सत्यंत्वर्तेनपरिषिञ्चामि" | ब्राह्मणम् २-१-११ | ९-१४-१४ |
| जलपानम् | "अमृतापस्तरणमसि" | नारायणम् ४-३२-४७ | ९-१४-११५ |
| | "अमृतोपिधानमसि" | नारायणम् ४-३५-५० | ९-१४-११६ |
| जलैः प्रोक्षणम् | "पवमानस्सुवर्जनः" | ब्राह्मणम् १-४-८ | ९-१४-१२४ |
| यजमानप्रार्थनम् | "सहस्रशीर्षा" | आरण्यकम् ३-२-३२ | १०-१०-१२३ |
| | "द्वादशनाममन्त्राः" | | |
| होमः | अन्तहोमः | | |
| | "यदस्य" | यजुस्संहिता ४-२-५ | |

## ४.२२. सङ्करोत्पन्नानां कथनम्

चातुर्वर्ण्यानां ब्राह्मणक्षत्रियवैश्यशूद्राणां सङ्करेण उत्पन्नानाम् अनुलोमप्रतिलोमान्तराळव्रात्यानाम् उत्पत्तिः तेषां नाम वृत्तिं च विशेषतया विलक्षणतया च वैखानसधर्मसूत्रे[1] सुस्पष्टमुपदिश्यते। तत्र

**अनुलोमः** नाम ऊर्ध्वजातिपुरुषात् अधोजातिस्त्रियः यःजातः सः अनुलोमः भवति।

**प्रतिलोमः** नाम अधोजातिपुरुषात् ऊर्ध्वकुलस्त्रियः समुत्पन्नः प्रतिलोमः भवति।

**अन्तराळः** नाम अनुलोमपुरुषात् अनुलोम्यस्त्रियः यः जातः सः अन्तराळः।

**व्रात्यः** नाम प्रतिलोमात् प्रतिलोम्यां स्त्रियः जातः व्रात्यः भवति।

एतेषाम् अनुलोमादीनां जाति - मातृ- पितृ - धर्म - वृत्ति - आकराणां पट्टिका वैखानसधर्मसूत्रोक्तदिशा सर्वेषां ज्ञानपिपासूनां सौकर्याय मयात्र दीयते।

## ४.२२.१. श्रीवैखानसधर्मसूत्रोक्त अनुलोमप्रतिलोमानां पट्टिका

| | मनुजः | पिता | माता | वृत्तिः | आकारः |
|---|---|---|---|---|---|
| १. | अनुलोमः | ऊर्ध्वजातीयः | अधोजातीया | | १०,११,१२७ |
| २. | प्रतिलोमः | अधोजातीयः | ऊर्ध्वजातीया | | १०,११,१२८ |
| ३. | अन्तरालः | अनुलोमः | अनुलोमा | | १०,११,१२९ |
| ४. | व्रात्यः | प्रतिलोमः | प्रतिलोमा | | १०,११,१३० |
| ५. | गोलकः | सजातीयः | अविवाहिता मृतभर्तुका च | | १०,११,१३३ |
| ६. | कुण्डः | सजातीयः | जीवभर्तुका विवाहविधि-हीना च | | १०,११,१३३ |
| ७. | भोजः | जारः | विवाहविधिहीना क्षत्रियस्त्री मृतभर्तुका जीवभर्तुका च | पट्टभद्रोभूत्वा राज सेवां करोति सेनाधिपत्यं वहति। शुद्धक्षत्रियः असम्भवे सति अपट्टभद्रो अपि पालनम् करोति | १०,११,१३५ |
| ८. | मणिकारः | जारः | मृतभर्तुका जीवभर्तुक विधिविहीना वैश्यस्त्री | वज्रवैदूर्यादीनां मणीनां चिद्रवृत्तिः | १०,११,१४० |
| ९. | माळवकः | जारः | मृतभर्तुका जीवभर्तुका विधिविहीना च | अश्वपालनम् तृणाहरणम् च | १०,११,१४२ |

| | | | | | |
|---|---|---|---|---|---|
| १०. | कुम्भकारः | जारब्राह्मणः | वैश्यस्त्री | नापित्वम् | १०,१२,१५४ |
| ११. | मद्गुः | क्षत्रियः | वैश्यस्त्री | वैश्यवृत्ति, क्षात्रकर्म | १०,१२,१५६ |
| १२. | आश्विकः | गूढक्षत्रियः | वैश्यस्त्री | अश्वक्रयविक्रयी | १०,१२,१५८ |
| १३. | पारशवः | विप्रः | शूद्रस्त्री | शक्तिपूजनम् चित्रलेखनं तूर्यघोषणम् मर्दनवृत्तिः | १०,१३,१६० |
| १४. | निषादः | जारः | शूद्रस्त्री | व्याघ्रवराहादि हननम्। | १०,१३,१६४ |
| १५. | उग्रः | क्षत्रियः | शूद्रस्त्री | दण्डनकार्यम् | १०,१३,१६४ |
| १६. | शूलिकः | जारः | शूद्रस्त्री | शूलारोहण-शिरश्चेदनादिकम् | १०,१३,१६६ |
| १७. | चूचुकः | वैश्यः | शूद्र स्त्री | पूगीफल-ताम्बूल-शाकाः-इन्धनादीनां क्रयविक्रयणम्। | १०,१३,१६८ |
| १८. | कटकारः | गूढवैश्यः | शूद्रस्त्री | कटादीनां विक्रयणम् | १०,१३, १७० |
| १९. | अन्तरालः | अनुलोमपुरुषः | अनुलोमस्त्री | पितुः अथवा मातुः कर्म | १०,१३,१७२ |
| २०. | सूतः | क्षत्रियः | ब्राह्मणस्त्री | राज्ञां कृते आचारा-दीनं बोधनम् अन्नसंस्कारश्च। | १०,१३,१७४ |
| २१. | रथकारः | जारक्षत्रियः | विप्रकन्या | अश्वादीनां पोषणं शिक्षणं च | १०,१३,१७७ |

| | | | | | |
|---|---|---|---|---|---|
| २२. | मागधः | वैश्यः | ब्राह्मणस्त्री | प्रशंसनं, कीर्तनं गानं च | १०,१३,१७८ |
| २३. | चक्री | गूढवैश्यः | ब्राह्मणस्त्री | लवण तैलादि विक्रयणम् | १०,१४,१८० |
| २४. | आयोगवः | वैश्यः | क्षत्रियस्त्री | वस्त्रनिर्माणं कांस्यजीवनम् | १०,१४,१८२ |
| २५. | पुलिन्दः | गूढवैश्यः | क्षत्रियस्त्री | अरण्ये अटन् मृगहननम् | १०,१४,१८४ |
| २६. | पुल्कसः | शूद्रः | क्षत्रियस्त्री | मद्यविक्रयणम् | १०,१४,१८६ |
| २७. | वेलवः | जारशूद्रः | क्षत्रियकन्या | स्तम्भननाट्य गानवृत्तिः | १०,१४,१८८ |
| २८. | वैदेहकः | शूद्रः | वैश्यस्त्री | अज-महिष-गवां-पालनम्, दधि क्षीर-आज्यादीनां विक्रयणं च। | १०,१४,१९० |
| २९. | चक्रिकः | जारशूद्रः | वैश्यस्त्री | लवणतिल-पिष्ठाद्यैः जीवनम् | १०,१४,१९२ |
| ३०. | चण्डालः | शूद्रः | ब्राह्मणस्त्री | सीसायासैः निर्मिताभरणानि धृत्वा सर्वकर्म परित्यागी सन् वीथ्यां- ग्राम- अन्यत्र च मलान्यपकृष्य बहिरपोहनञ्च | १०,१४,१९४ |
| ३१. | तक्षकः | चूचुकः | ब्राह्मणस्त्री | काष्ठकर्मवृत्तिः सुवर्णायसैः द्रव्यनिर्माणम्। | १०,१४,२०१ |

| | | | | | |
|---|---|---|---|---|---|
| ३२. | मत्स्यबन्धुः | चूचुकः | क्षत्रियस्त्री | मत्स्यविक्रयणम् | १०,१४,२०३ |
| ३३. | सामुद्रः | चूचुकः | वैश्यस्त्री | समुद्रद्रव्य-विक्रयणम् | १०, १४, २०५ |
| ३४. | नाविकः | अम्बष्ठः | ब्राह्मणस्त्री | - | १०, १५, २०७ |
| ३५. | नापितः | अम्बष्ठः | क्षत्रियस्त्री | नाभेः अधो-भागवपनम् | १०, १५, २०९ |
| ३६. | वेणुकः | मद्गुः | विप्रस्त्री | वेणुनादं वीणानादं च | १०, १५, २११ |
| ३७. | कर्मकारः | मद्गुः | क्षत्रियस्त्री | कर्मकारी | १०, १५, २१३ |
| ३८. | चर्मकारः | वैदेहः | विप्रस्त्री | चर्मसम्बन्धिकर्म | १०, १५, २१५ |
| ३०. | सूचिकः | वैदेहः | क्षत्रियस्त्री | वस्त्रादीनां सीवनम् | १०, १५, २१७ |
| ४०. | ताम्रः | आयोगवः | विप्रस्त्री | ताम्रेण पात्रादीनां निर्माणम् | १०,१५,२१९ |
| ४१. | खनकः | आयोगवः | क्षत्रियस्त्री | खननकर्म | १०, १५, २२१ |
| ४२. | उद्बन्धकः | खनकः | क्षत्रियस्त्री | वस्त्रनिर्णेजकम् | १०, १५, २२३ |
| ४३. | रजकः | पुल्कसः | विप्रस्त्री | मलिनवस्त्राणां निर्णेजकम् | १०, १५, २२५ |
| ४४. | श्वपचः | चण्डालः | विप्रस्त्री | मूत्रपुरीष-निष्कासनम् | १०, १५, २२७ |

# पञ्चमोऽध्यायः

## उपसंहारः

श्रीवैखानसधर्मसूत्रस्वरूपम् इत्यस्मिन् पञ्च अध्यायपरिमिते विवरणात्मकग्रन्थे कल्पसूत्रपरिचयः नाम **प्रथमाध्याये** निगमः, वेदः, वेदभागाः, वेदभागपरिचयः, षडङ्गानि, कल्पः, कल्पसूत्रस्वरूपं, शाखान्तर्गतानि कल्पसूत्राणि, श्रीवैखानसकल्पसूत्रम् इत्येते अंशाः साङ्गोपाङ्गं चर्चिताः सन्ति।

श्रीवैखानसागमपरिचयः इत्यस्मिन् **द्वितीयाध्याये** आगमः, वैष्णवागमः, पाञ्चरात्रागमः, पाञ्चरात्रागमग्रन्थाः वैखानसागमः, वैखानसागमग्रन्थाः, वैखानसकल्पसूत्रं, भृगुमहर्षि-ग्रन्थाः, मरीचिमहर्षिग्रन्थाः, अत्रिमहर्षिग्रन्थाः, कश्यपमहर्षिग्रन्थाः, वैखानसागमग्रन्थस्वरूपः, वैखानसागमसम्बद्धाः आलयाः, श्रीवेङ्कटाद्रिदिव्यक्षेत्रस्वरूपं, श्रीवेङ्कटाचलस्य नित्यनैमित्तिक-काम्योत्सवाः इत्येते विषयाः समालोचिताः सन्ति।

श्रीवैखानसकल्पसूत्रपरिचयः इत्यस्मिन् **तृतीयाध्याये** श्रीवैखानसकल्पसूत्रं, श्रीवैखानसगृह्यसूत्रं, श्रीवैखानसधर्मसूत्रं, श्रीवैखानसप्रवरसूत्रं, श्रीवैखनसश्रौतसूत्रं, श्रीवैखानसधर्मसूत्रभाष्याणि श्रीवैखानसर्धसूत्रे विशिष्टाः धर्माः इत्येते अंशाः साङ्गोपाङ्गं सप्रमाणं मया समालोचिताः अभवन्।

श्रीवैखानसधर्मसूत्रस्वरूपम् इत्यस्मिन् **चतुर्थाध्याये** वैखानसधर्मसूत्रे ये अंशाः उपदिष्टाः अंशाः सन्ति तेषां समीक्षा

मयाकृता । ते तावत् वर्णाश्रमधर्माः, आश्रमभेदाः, ब्रह्मचारि, ब्रह्मचारिधर्माः, ब्रह्मचारिभेदाः, गृहस्थः , गृहस्थधर्माः, गृहस्थभेदाः, वानप्रस्थः, वानप्रस्थधर्माः, श्रामणकाग्निकुण्डलक्षणं वानप्रस्थभेदाः, श्रीवैखानससूत्रोक्तवानप्रस्थस्य सार्वत्रिकता, भिक्षुकः, भिक्षुकधर्माः भिक्षुकभेदाः, आश्रमधर्मानुष्ठानफलं, वर्णाश्रमाणां मोक्षोपायः, सदाचाराः, सामान्यधर्माः, नारायणबलिः, इत्येतैः अंशैः सह श्रीवैखानसधर्मसूत्रे तत्तदाश्रमधर्मकर्मानुष्ठाने ये ये मन्त्राः सन्ति ते च पट्टिकारूपेण प्रदर्शिता अभवन्। ततः सङ्करोत्पन्नानां कथनम्, अनुलोमप्रतिलोमानां पितृ-मातृ-वृत्ति - आकर-निर्णयविधानम् इत्येते अंशाः अपि विवरणार्थं स्वीकृताः वर्तन्ते। अयमुपसंहाररूपः **पञ्चमाध्यायः**।

**प्रथमानुबन्धे** दशविधहेतुनिरूपणे **मन्वाद्यैः स्वीकृतत्वात्** इति अष्टमहेतुः यावान् ग्रन्थः तावानत्र प्रदर्शितः।

**द्वितीयानुबन्धे** वैखानसधर्मसूत्रे चातुर्वर्ण्यसङ्करोत्पन्नकथनप्रतिज्ञायां यानि **सूत्राणि** सन्ति तान्यत्र मया प्रदर्शितानि अभवन्।

**श्रीवैखानसधर्मसूत्रस्वरूपम्** इत्ययं विवरणात्मकग्रन्थः सर्वेषां कृते विज्ञानसर्वस्वो भवतु इत्याशास्य पण्डितमण्डलीयमण्डनायमानेभ्यः सर्वेभ्यो विद्वद्भ्यः नमांसि भूयांसि च वितीर्य विरम्यते।

**धर्मस्य प्रभुरच्युतः।**
**श्रीनिवासस्सतां गतिः ॥**

# अनुबन्धः-१

## दशविधहेतुनिरूपणे अष्टमहेतुः

## मन्वाद्यैः स्वीकृतत्त्वात्

इदानीं तावत् श्रुतिस्मृतिपुराणादिभिः सर्वोत्तरत्वेनावगतस्य श्रीवैखानससूत्रस्य अखिलशिष्टपरि-गृहीतत्वमस्तीति दर्शयितुं मन्वाद्यैः स्वीकृतत्वादिति अष्टम हेतुः निरूप्यते। तथाहि-

**मनुः** 'अतः परं प्रवक्ष्यामि धर्मं वैखानसाश्रयम्। इत्यारभ्य
पुष्पमूलफलैर्वापि' केवलैर्वर्तयेत्सदा।
कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः।। इति।

**व्यासः** 'मूलैरेके फलैरेके पुष्पैरेके दृढव्रताः।
वर्तयन्ति यथा न्यायं वैखानसमते स्थिताः।।' इति।

**गौतमः** 'श्रामणकेनाग्निमाधायाऽग्राम्यभोजी' इति।

**यमः** 'श्रामणकेन विधानेन सायं प्रातरुपस्पृशेत्' इति।

**शङ्खलिखितौ** 'श्रामणकेनाग्निमाधाय काले कुरुविन्द - वेणु - श्यामाकनीवारादिभिर्वर्तयेत्' इति।

**हारीतः** 'वानप्रस्थो ग्राम्या ओषधीः परिवर्जयेत्। त्रेताग्नीनां स्थाने श्रामाणकं वाऽग्निमाधाय वल्कलशाणचर्म-कुशामुञ्जविदलकं वा वसानो वैखानसप्रोक्तेन विधिना वानप्रस्थो विखना भवति।
अनुज्ञायिकोऽनुप्रस्थायिकश्चेति'।

**वसिष्ठः** 'श्रामणकेनाग्निमाधायाऽहिताग्निर्वृक्षमूलकः' इति।

**बोधायनः** 'वानप्रस्थो वैखानसशास्त्रसमुदाचार' इति।

**आपस्तम्बः** 'एकाग्निरनिकेतः स्या' दिति। अस्य धर्मकपर्दी- 'गार्हपत्यादीनां त्रेताग्नीनां स्थाने यस्यैकोऽग्निः औपासन एव वैखानससूत्रे उपदिष्टत्वात्। पाणिग्रहण निमित्तत्वादौपासनस्य।'

**जैमिनीयसूत्रे** सौमिकचातुर्मास्यप्रकरणे 'भारद्वाजपूर्वं यथा वैखानसपूर्वं पञ्च' मेति ।

अत्रोभयत्र **अत्रिव्याख्यानम्** 'षोडशर्त्विजां मध्ये भारद्वाजसूत्रिणं प्रस्तोतारं वैखानससूत्रिणं प्रतिहर्तारं वरयेत्' इति।

**कपिञ्जलसंहितायाम् :**

**याजनाध्यापनयुतः शिष्यानुग्रहकारकः।**
**आचार्य इति विज्ञेयो मन्त्रतन्त्रपरायणः॥**

**आश्रमे वा वने वापि पुत्रदारसमाहितः।**
**अष्टाक्षरपरो नित्यं स वैखानस उच्यते॥**

**ग्राम्यधर्माणि सर्वाणि वर्जयेद्वनवासकः।**
**वल्कलाजिनसंवीतः स मौनीत्यभिधीयते॥** इति।

**पाद्मे द्वादशाक्षरप्रकरणे :**

**..... ......... ....... पुत्रदारसमन्वितः।**
**वने वा पत्तने वापि जपेद्वैखानसः शुचिः॥**

वियुक्तः पुत्रदाराद्यैः स्वयमेव वने स्थितः ।। इति

अन्यैरप्येवमेवोक्तम्।

अखिलशिष्टपरिग्रहे को विशेष इति चेत् अखिलशिष्टपरिग्रहात् प्रामाण्यातिशयोऽस्तीत्यवगम्यते।

आश्वमेधिके धर्मं जिज्ञासमानानां प्रमाणं प्रथमं श्रुतिः।
द्वितीयं धर्मशास्त्रं हि तृतीयं लोकसङ्ग्रहः ।। इति

मनुः विद्वद्भिस्सेवितं सम्यक् नित्यमद्वेषरागिभिः।
हृदयेनाऽभ्यनुज्ञातो यो धर्मस्तं निबोधत।। इति

याज्ञवल्क्यः चत्वारो वेदधर्मज्ञाः पर्षत् त्रैविद्यमेव वा।
सो ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मवित्तमः।।
इति

वेदाः प्रमाणं स्मृतयः प्रमाणं वचनं प्रमाणम्।
यस्य प्रमाणं न भवेत्प्रमाणं कस्तस्य कुर्याद्वचनं
प्रमाणम् ।।

न यस्य वेदा न च धर्मशास्त्रं न वृद्धवाक्यं च
भवेत्प्रमाणम् ।
सोऽधर्मकृद्दुष्टहतो दुरात्मा स्वात्माऽपि तस्यैव
भवेत्प्रमाणम्।।

स्मृतेरपि वेदमूलत्वे त्रेधा निर्वाहः कृतः।

नित्यानुमेयश्रुतिमूलत्वं प्राभाकराः। 'तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्त' इत्युत्सन्नशाखामूलत्वमापस्तम्बाद्याः। तत्प्राभाकरादिभिः दूषितं भाष्यकारानभिमतञ्च। प्राभाकरपक्षेपि नित्यानुमेयश्रुतिमूलत्वे अक्षरशो वा आनुपूर्वी विशेषविशिष्टत्वेन वा। अक्षरश इति यदुच्यते तर्हि कटतपयादीनामपि नित्यानुमेयश्रुतिमूलत्वात् स्मृतित्वं स्यात्। आनुपूर्वी विशेषविशिष्टत्वेनेति चेत् नित्यानुमेयत्वं भज्येतेति। उत्सन्नशाखामूलत्वमिति पक्षे शाखासु तत्र तत्रोत्सना वा उतैका शाखा उत्सन्ना वा। तत्रेति चेत् न पदक्रमादिरूपेणाधीयमानत्वादुत्सन्नशाखामूलत्वं न घटते एकैवोत्सन्नेति चेत् न विष्णोरंशावतारस्य तपोयोगबलोपेतस्य सर्ववेदसाक्षात्कारवतो व्यासस्य अज्ञाताशासम्भवेन एकस्याऽपि शिष्यस्य तदध्यापनसामर्थ्यसम्भवात् तथा वक्तुमयुक्तत्वादिति। अतो विप्रकीर्णशाखामूलत्वं वक्तव्यम् । तथोक्तम् -

**दुर्बोधा वैदिकाश्शब्दा प्रकीर्णत्वाच्च ये खिलाः।**
**तद्ज्ञैस्त एव स्पष्टार्थाः स्मृतितन्त्रे प्रतिष्ठिताः ।।** इति।

अतः श्रुतिस्मृतिपुराणादिभिः प्रमाणत्वेनावगतस्य श्रीवैखानससूत्रस्य अखिलशिष्टपरिग्रहात् प्रामाण्यातिशयोऽस्तीऽति मन्वाद्यैस्स्वीकृततत्वा दिति निरूपितोऽष्टमो हेतुः।

## अनुबन्धः -२

# श्रीवैखानसधर्मसूत्रम्

## दशमप्रश्नः

अथ चातुर्वर्ण्यसङ्करेणोत्पन्नानामनुलोमप्रतिलोमान्तरालव्रात्यानामुत्पत्तिं नाम वृत्तिं च।

### अनुलोमस्वरूपम्

ऊर्ध्वजातादधोजातायां जातोऽनुलोमः।

### प्रतिलोमस्वरूपम्

अधरोत्पन्नादूर्ध्वजातायां जातः प्रतिलोमः।

### अन्तराळस्वरूपम्

ततोऽनुलोमादानुलोम्यां जातोऽन्तराळः।

### व्रात्यस्वरूपम्

प्रतिलोमात्प्रतिलोम्यां जातो व्रात्यो भवति।

### ब्राह्मणस्वरूपम्

ब्रह्मणो मुखादुद्भूता ब्राह्मणा ब्राह्मण्यश्च।

### शुद्धब्राह्मणः

ब्रह्मर्षयः पत्न्यो बभूवुः तेषां गोत्रोत्पन्नाद् ब्रह्मणाद्ब्राह्मण्यामसगोत्रायां विधिना समन्त्रकं गृहीतायां जातो ब्राह्मणश्शुद्धो भवेत्।

**कुण्डगोळकौ**

विधिहीनमन्यपूर्वायां मृतभर्तृकायां गोळको ।
जीवभर्तृकायां कुण्डश्च विप्रौ द्वौ निन्दितौ स्याताम् ।

**शुद्धक्षत्रियः**

तस्मादधोबाहुभ्यामुत्पन्नात् क्षत्रियात् क्षत्रियायां विधिवज्जातः क्षत्रियश्शुद्धः।

**भोज :**

तयोरविधिकं गूढोत्पन्नोऽशुद्धो भोजाख्यो नैवाभिषिच्यः।

**तद्वृत्तिः**

पट्टबद्धो राज्ञस्सेनापत्यं करोति।
शुद्धाभावे पट्टबद्धो नॄन् पायात्।
तद्वृत्तं राजवत्स्यात्।

**शुद्धवैश्यः**

अधस्तादूरुभ्यामुत्पन्नाद्वैश्यायां तथा वैश्यश्शुद्धः।

**मणिकारस्तद्वृत्तिः**

विधिवर्जं मणिकारोऽशुद्धो मणिमुक्तादिवेदः शङ्खवलयकारी स्यात्। **इत्येकादशः खण्डः**

**शुद्धशूद्रः**

अथ पद्भ्यामुत्पन्नाच्छूद्राच्छूद्रायां न्यायेन शूद्रश्शुद्धः।

**माळवकस्तद्वृत्तिः**

जारान्माळवको निन्दितश्शूद्रोऽश्वपालकोऽश्वतृणहरी च। इत्येते चातुर्वर्णिकाः।

**सङ्करोत्पन्न अनुलोमाद्युत्पत्तयः वृत्तयश्च।**

तेषामेव सङ्करेणोत्पन्नास्सर्वेऽनुलोमाद्याः।

ब्राह्मणात् क्षत्रियकन्यायां जातस्सवर्णेऽनुलोमेषु मुख्यः।

अस्यवृत्तिराथर्वणं कर्माश्वहस्तिरथसंवाहनमारोहणं राज्ञस्सेनापत्यंचायुर्वेदकृत्यं वा।

गूढोत्पन्नोऽभिषिक्ताख्यः।

अभिषिक्तश्चेन्नृपोभूयात्।

आयुर्वेदं भूततन्त्रं वा सम्पठेत्।

तदुक्ताचारोदयायुक्तस्सत्यवादी तद्विधानेन सर्वप्राणिहितं कुर्यात्।

ज्योतिर्गणनादिकवृत्तिर्वा।

विप्राद्वैश्यायामम्बष्ठः।

कक्ष्याजीव्याग्नेयनर्तको ध्वजविश्रावकश्शल्यचिकित्सी वा।

जारात्कुम्भकारः

कुलालवृत्तिर्नापितो नाभेरूर्ध्ववप्ताच।

क्षत्रियाद्वैश्यायां मद्गुः।

श्रेष्ठित्वं प्राप्तो महानर्माख्यश्च वैश्यवृत्तिः क्षात्रं कर्म नाचरति।

गूढादाश्विकः।

अश्वक्रयविक्रयीस्यात् ।

**इति द्वादशः खण्डः॥**

विप्राच्छूद्रायां पारशवः ।

भद्रकाळीपूजन चित्रकर्माऽङ्गविद्या तूर्यघोषण मर्दनवृत्तिः।

जारोत्पन्नोनिषादः ।

व्याळादिमृगहिंसाकारी ।

राजन्यतश्शूद्रायामुग्रः।

सुदण्डयदण्डनकृत्यः ।

जाराच्छूलिकः ।

शूलारोहणादियातनाकृत्यः ।

वैश्यतश्शूद्रायां चूचुकः।

क्रमुक ताम्बूल शाक काष्ठादि क्रयविक्रयी।

गूढात्कटकारः ।

कटकारीचेति ।

ततोऽनुलोमादनुलोमायां जातश्चान्तराळः ।

पितुर्मातुर्वा जातिं वृत्तिं भजेत ।

क्षत्रियाद्विप्रकन्यायां मन्त्रवज्जातस्सूतः।

प्रतिलोमेषु मुख्योऽयं मन्त्रहीनोपनीतो द्विजधर्महीनः ।

अस्यवृत्तिर्धर्मानुबोधनं राज्ञोऽन्नसंस्कारश्च।

जारेण मन्त्रहीनजो रथकारो द्विजत्वहीनश्शूद्रकृत्यो अश्वानां पोषण दमनादि परिचर्याजीवी ।

वैश्यादूब्राह्मण्यां मागधः।

शूद्रैरप्यभोज्यान्नोऽस्पृश्यस्सर्ववन्दी प्रशंसा कीर्तन गान प्रेषणवृत्तिः

गूढाच्छक्री ।

लवणतैलविक्रेता स्यात् ।

**इति त्रयोदशः खण्डः॥**

वैश्यान्नृपायामायोगवस्तन्तुवायः ।

पटकर्ता वस्त्रकांस्योपजीवी ।

गूढाचारात्पुलिन्दः ।

अरण्यवृत्तिर्दुष्टमृगसत्वघाती ।

शूद्रात् क्षत्रियायां पुल्कसः ।

कृतकां वार्क्षां वासुरां हृत्वा पाचको विक्रीणाति च।

चोरवृत्ताद्वेळवः ।

जम्भननर्तनगानकृत्याः।

शूद्राद्वैश्यायां वैदेहकः।

शूद्रास्पृश्यस्तैरप्यभोज्यान्नो वन्यवृत्तिरजमहिष-गोपालस्तद्रसविक्रयी-

चौर्याच्छक्रिकः ।

लवणतैलपिण्याकजीवी ।

शूद्रादूब्राह्मण्यां चण्डालः ।

सीसकाळायसाभरणो वर्ध्राबन्धकण्ठः कक्षे झल्लरी युक्तो

यतस्ततस्सञ्चरन्सर्वकर्मबहिष्कृतः पूर्वाह्णे ग्रामादौ वीथ्यामन्यत्रापि मलान्यपकृष्य बहिरपोहयति

ग्रामाद्बहिर्दूरे स्वाजातीयैर्निवसेत् ।

मध्याह्नात्परं ग्रामं न विशत्ययम्।

प्रविशेच्चेद्राज्ञा वद्ध्यः।

अन्यथा भ्रूणहत्यामवाप्नोति।

अन्तराळव्रात्याश्च ।

चूचुकाद्विप्रायां तक्षकः ।

अस्पृश्यो झल्लरीहस्तो दारुकारस्सुवर्णकारो अयस्कारो कांस्यकारो वा।

क्षत्रियायां मत्स्यबन्धुः ।

मत्स्यबन्धी ।

वैश्यायां सामुद्रः ।

समुद्रपण्यजीवी मत्स्यघाती च स्यात्।

**इति चतुर्दशः खण्डः ॥**

अम्बष्ठाद्विप्रायां नाविकः ।

समुद्रपण्यमत्स्यजीवी समुद्रलङ्घनान्नावं प्लावयति।

क्षत्रियायामधोनापितः ।

नाभेरधो रोमवप्ता।

मद्गोर्विप्रायां वेणुकः ।

वेणुवीणावादि ।

क्षत्रियायां कर्मकारः।

कर्मकारी।

वैदेहाद्विप्रायां चर्मकारः।

चर्मजीवी।

नृपायां सूचिकः।

सूचीवेधनकृत्यवान्।

आयोगवद्विप्रायां ताम्रः।

ताम्रजीवी।

नृपायां जातः खनकः।

खननजीवी।

खनकान्नृपायामुद्बन्धकः।

शूद्रास्पृश्यो वस्त्रनिर्णेजकः

पुल्कसाद्विप्रायां रजकः।

वस्त्राणां रजो निर्णेजकः।

चण्डाळाद्विप्रायां श्वपचः।

चण्डाळवच्चिह्नयुक्तो नित्यनिन्द्यस्सर्वकर्मबहिष्कार्यो नगर्यादौ मलापोहक श्श्मशाने वसन् ह्येयपात्रग्राही प्रेतमबन्धुकं विसृजेत्।

वध्यान् हत्वा तद्वस्त्रादीन् गृह्णीयात्।

पराधीनाहारो भिन्नपात्रभोजी श्वमांसभक्षी चर्मवारवाण-वाणिज्यकारी स्यात्।

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT OF INDIA)
ACCESSION NO. 30461
DATE 29/11/12

तस्मान्निकृष्टे सुते समुत्पन्ने पतितो नष्टो घोरान्नरकान्व्रजति।
सत्पुत्रो नरकेभ्यस्त्रायकः पितॄन्पावयित्वा शुभांल्लोकान्नयति।
तस्माद्ब्राह्मणाद्यास्सवर्णायां विधिवत्पुत्रमुत्पादयेयुरित्याह भगवान्विखनाः।

**इति पञ्चदशः खण्डः ॥**

**इति दशमःप्रश्नः ॥**

# उपयुक्तग्रन्थसूची


१. **आगममीमांसा**

व्रजवल्लभद्विवेदः, श्रीलालूबहादूरशास्त्रीकेन्द्रियसंस्कृत-विद्यापीठम्, नई दिल्ली, १९८२.

२. **आपस्तम्बधर्मसूत्रम्**

ए. चिन्नस्वामी, ए. रामनाथशास्त्री, चौखाम्बापब्लिकेषन्स्, वाराणसी, १९९९

३. **ऋग्वेदसंहिता**

वासुदेवशर्मा, निर्णयसागरप्रेस्, मुम्बाई, १९३०

४. **क्रियाधिकारः**

श्रीपार्थसारथिभट्टाचार्यः, तिरुमलतिरुपतिदेवस्थानानि, तिरुपतिः, १९९८.

५. **खिलाधिकारः**

श्रीपार्थसारथिभट्टाचार्यः, तिरुपमलतिरुपतिदेवस्थानानि, तिरुपतिः, १९९७.

६. **ज्ञानकाण्डः**

श्रीपार्थसारथिभट्टाचार्यः, तिरुमलतिरुपतिदेवस्थानानि, तिरुपतिः, १९९८,

७. **गौतमधर्मसूत्राणि**

कुमुदिनीदेवी, पुरी, १९९१

८. **धर्मकोशः वर्णाश्रमधर्मकाण्डम्**

गोविन्दशास्त्री केळकर्, पि.पि.एस्.यम्. ग्रन्थमाला, पूने, २०००

९. **श्रीपारमात्मिकोपनिषत् एकमध्ययनम्**
पेद्दिण्टि सूर्यसत्यश्रीनिवासः, गुदिमेल्लङ्का, २००७

१०. **श्रीपारमात्मिकोपनिषद् भाष्यम्**
दीवि वेङ्कटनृसिंहाचार्यः, श्रीवैखानसगन्र्थमाला, नल्लूरु, १९४८

११. **प्रकीर्णाधिकारः**
माडंबाकं कृष्णस्वामिश्रीनिवासभट्टाचार्यः, तिरुमलतिरुपतिदेवस्थानानि, तिरुपतिः, १९९७

१२. **बौधायनधर्मसूत्रम्**
ए. चिन्नस्वामिशास्त्री, चौखाम्बासंस्कृतसंस्थान्, वाराणसी, १९९४

१३. **वाचस्पत्यम्**
श्रीतारानथतर्कवाचस्पतिः, चौखाम्बासंस्कृत-संस्थान्,वाराणसी, १९६९, १९७०

१४. **विमानार्चनाकल्पः**
श्रीरघुनाथचक्रवर्तिभट्टाचार्यः & सेतुमाधवाचार्यः, तिरुमलतिरुततिदेवस्थानानि, तिरुपतिः, १९९८

१५. **विमानार्चनाकल्पस्य समालोचनात्मकमध्ययनम्**
डा. वेदान्तं श्रीविष्णुभट्टाचार्यः, अप्पिकट्ल, २००४.

१६. **वैष्णवागमविमर्शः**
आचार्य श्रीव्रजवल्लभद्विवेदः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी, १९९७.

१७. **श्रीभगवदाराधनाविधिः**
डा. वेदान्तंश्रीविष्णुभट्टाचार्यः, हिन्दूधर्मप्रचारपरिषद्, तिरुमलतिरुपति- देवस्थानानि, तिरुपतिः, २००७.

१८. **श्रीवैखानसकल्पसूत्रम्**
पण्डित वेदान्तं जगन्नाथाचार्यः, श्रीविखनसाट्रष्ट, तिरुमल, २००५.

१९. **श्री वैखानसगृह्यसूत्रम्** (श्रीनिवासदीक्षितीयभाष्यम्, भागद्वयम्)
पार्थसारथिभट्टाचार्यः, तिरुमलतिरुपतिदेवस्थानानि, तिरुपतिः, १९९७

२०. **श्रीवैखानसस्मार्तसूत्रम्** (श्रीनृसिंहवाजपेयभाष्यसहितम्)
श्रीमान् रोंपिचर्ल पार्थसारथिभट्टाचार्यः, श्रीवैखानसमहामण्डलिः, विजयवाटिका, १९८७.

२१. **श्रीवैखानसश्रौतसूत्रम्**
डा. रोंपिचर्ल श्रीनिवासाचार्यः, प्रसन्नलक्ष्मीपब्लिकेषन्स्, तिरुपतिः, २००८.

२२. **समूर्तार्चनाधिकरणस्य समीक्षत्मकमध्ययनम्**
डा. नारायणं वेङ्कटराम्बाबु, श्रीसीतारामप्रकाशनम्, नरसारावुपेट, २००७.

२३. **संस्कृतवाङ्मयम्**
डा. हरिकृष्णशास्त्रिदातारः, कीर्तिसौरभप्रकाशनम्, वाराणसी, १९८९.

२४. **संस्कृतसाहित्येतिहासः**
आचार्य लोकमणिदाहालः, कृष्णदास् अकाडमी, वाराणसी, १९९३.

**आन्ध्रग्रन्थाः**

१. **आगमदर्शिनी**
डा. वेदान्तं श्रीविष्णुभट्टाचार्युलु तिरुमलतिरुपतिदेवस्थानानि, तिरुपतिः, २००८.

२. **आर्षवाङ्मयचरित्र**
वेदान्तं श्रीनिवासाचार्युलु, गुण्टूरु, १९७९.

३. **मनुस्मृतिः (कुल्लूकभट्टव्याख्या)**
वेङ्कटसुब्बरामशास्त्रिबालसरस्वतीबुक्डिपो, कर्नूलु, १९८८.

४. **मानवधर्ममुलु**
श्रीश्रीपादनरसिंहशास्त्री, चेन्नै, १९३६.

५. **वेदविज्ञानदर्शनमु**
वेदान्तं श्रीनिवासाचार्युलु, गुण्डूरु- १९८२

६. **वैखानसागममु**
आचार्य पोणङ्गि श्रीराम अप्परावु, तिरुमलतिरुपति-देवस्थानानि, तिरुपतिः, १९९३

७. **श्रीवेङ्कटेश्वरवैभवमु**
पण्डित वेदान्तं जगन्नाथाचार्युलु, तिरुमलतिरुपति-देवस्थानानि, तिरुपतिः, २००८.

## हिन्दीग्रन्थाः

१. **कल्पसूत्र** (वैदिकवाङ्ग्यका बृहदितिहास)
कुन्दनलाल्शर्मा, विश्वेश्वरानन्दवैदिकशोधसंस्थान् प्रकाशनम् होशियरम् पुरम्, पंजाब्, १९८१.

२. **संस्कृतवाङ्ग्य का बृहदितिहास्**
बलदेव उपाध्याय, उत्तरप्रदेशसंस्कृतसंस्थान्, लखनो

## आंग्लग्रन्थाः

1. **History of Dharma Sasthra**
P.V. Kane., Bandarkar Oriental Research Institute.
Poona, 1975.

2. **Agama - kosha - (Vol-III)**
By. S.K. Ramachandra Rao, Kalpatharu Research Academy,
Bangalore, 1990.

## शोधलेखाः

१. **अभ्युदयनिःश्रेयसोपायाः आगमाः**
डा. वेदान्तं श्रीविष्णुभट्टाचार्यः, **श्रुतिविवेचनी**, तिरुमलतिरुपतिदेवस्थानानि, धर्मगिरि, तिरुमल, २००८.

२. **पाञ्चरात्रागमानां विमर्शः**
डा. शीतलप्रसादपाण्डेयः, **शोधप्रभा**, श्रीलालबहादूरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली, २००८.

३. **वैखनासागमः**

श्रीलक्ष्मीनरसिंहभट्टः, विमर्शः, राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली, १९८३.

४. **वैखानसागमे तत्त्वविचारः**

डा. वेदान्तं श्रीविष्णुभट्टाचार्यः, **Oriental Journel of S.V.O.R.I.**, S.V.U., Tirupati- 2006

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT. OF INDIA)
PURANATTUKARA
THRISSUR-680551-KERALA.
LIBRARY

**CENTRAL SANSKRIT UNIVERSITY**

(Under Ministry at Education, Govt. of India)

**GURUVAYOOR CAMPUS LIBRARY**

**Due Date Slip**

Title : Sri vaikhanasa Dharmasutraswarupam

Author : Vadapalli Pavan Kumar

Acc. No. 30461

This book should be returned to the library on or before the date last stamped. Otherwise over-due charges of ₹1/- per book per day will be collected.

| Due date of Return | Due date of Return | Due date of Return |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |
| | | |

# ABOUT THE EDITOR

**Name** : Dr. Vedantam Sri Vishnu Bhattcharyulu

**Parents** : Desikacharyulu, Dhanalakashmi.

**Date of Birth** : 05-07-1964

**Educational Qualifications** : M.A. Sanskrit, M.Phil Agama, Ph.D., in Vaikhanasagama.

**Traditional Knowledge** : Studies Vaikhanasagama and Jyotisha traditionally.

**Present Employment** : Asso. Professor in Agama R.S. Vidyapeetham, Tirupati.

**Honorary Post** : 1) Advisor for Vaikhanasagama, T.T.D.

2) Member of the Examination Board, Vaikhanasagama, Dept. of Endowments Govt. of A.P.

**Published Works** : A) **Books :** More than 20 books are published in Sanskrit and Telugu Languages.

B) **Research Articles** : More than 30 research articles published in Sanskrit and Telugu.

c) **Commentaries Delivered :** Delivered more than 100 Live commentaries on various ... in A.I.R., T.V.,

CSUGCKL 1
R68
30461
Acc.No: 30461

**Research Guidance** : ... Students were ... 5 Research

**Other Experience** : ... Brahmostava, Pavitrotsava, Astottara Sathakundatmaka Maha Varuna Yaga, Santhi Yaga and Samprokshana etc.

**Seminars** : Conducted about 30 Agama / Vedic seminars. Also conducted training classes for archakas through SVETA, T.T.D.

**Honours received** : Honoured with the Ugadi Puraskaram in 2006 by the Govt. of A.P.